एष सर्वेश्वरः एष सर्वज्ञ एषोंतर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानां ॥

स्य सर्वभेदावस्थो ज्ञातेत्येष सर्वज्ञः एषोंतर्यामी अंतरनुप्रविश्य सर्वेषां भूतानां नियंताप्येष एव अत एव यथोक्तं
सभेदं जगत्प्रसूयत इत्येष योनिः सर्वस्य यत एवं प्रभवश्चाप्ययश्च प्रभवाप्ययौ हि भूतानामेष एव ॥ ॥ ॥

येवस्थतीति युज्यते नहि जीवस्य परमात्मातिरेकेणापर्यवसानमस्ति मनस्तदुपहितं जीवं चैतन्यमत्र प्राणशब्दस्याध्या
परब्रह्मसूरि त्मिकार्थस्य परस्मिन्प्रयोगात् मनःशब्दितस्य च जीवस्य तस्मिन्पर्यवसानाभिधानात्तु तेनाभेदो नास्तीति द्योतितमित्यर्थः प्राज्ञस्यैव वि
शेषणांतरं साधयति अयमेवेति नन्ववधारणं नोपपद्यते आसमपरास्तरप्रभृतीनामन्येषामपि सर्वज्ञत्वप्रसिद्धेरित्याशंक्यावि राम॰
शिनष्टि सर्वेति अंतर्यामित्वं विशेषणांतरं विवृणोति अंतरिति अन्यस्य कस्यचिदंतरनुप्रवेशेन नियमने च सामर्थ्याभावादव ११
धारणं उक्तं विशेषणत्रयं हेतुकृत्य प्रकृतस्य प्राज्ञस्य सर्वजगत्कारणत्वविशेषणांतरमाह अत ॥ ॥ ॥

यथेत्यादिना एवकारस्यान्ययोगव्यवच्छित्तिरर्थः किं त्वन्ययोगव्यवच्छित्तिरित्याह एवशब्दादिति प्राज्ञस्यानंदविकारत्वाभावे कथमानंदमयत्वविशेषणमित्याशंक्य स्वरूपसुखाभिव्यक्तिप्रतिबंधकदुःखाभावात्प्राचुर्यार्थत्वं मयटो गृहीत्वा विशेषणोपपत्तिं दर्शयति मनसइति मयटः स्वरूपार्थत्वादानंदमयत्वमानंदत्वमेव किं न स्यादित्याशंक्याह नेत्यादिना न हि सुषुप्ते निरुपाधिकानंदत्वं प्राज्ञस्याभ्युपगंतुं शक्यं तस्य कारणोपहितत्वादन्यथा मुक्तत्वात्पुनरुत्थानायोगात्तस्मान्नैवं प्राचुर्यमेवास्य स्वीकर्तुं युक्तमित्यर्थः आनंदभुगिति विशेषणांतरं संगतमाचष्टे यथेति तथा सुषुप्तोऽपीति शेषः दार्ष्टांतिकं विवृणोति अत्यंतेति इयं स्थितिरिति सुषुप्तिरुक्ता अनेनेति प्राज्ञोक्तिः सोऽषुप्तस्य पुरुषस्य तस्यामवस्थायां स्वरूपभूतनित्यानंदाभिव्यक्तिरस्तीत्यत्र प्रमाणमाह एषोऽस्येति प्राज्ञस्य चेतोमुखइति विशेषणांतरं तदाचष्टे स्वप्नादीति

यथा रात्रौ नैशेन तमसाऽविभज्यमानं सर्वं घनमिव तद्वत्प्रज्ञानघन एव एवशब्दाज्जात्यंतरं प्रज्ञानव्यतिरेकेण नास्तीत्यर्थः मनसो विषयविषय्याकारस्पंदनायासदुःखाभावादानंदमयः आनंदप्रायो नानंद एव आनात्यंतिकत्वात् यथा लोके निरायासः स्थितः सुखी आनंदभुगुच्यते अत्यंतानायासरूपा हीयं स्थितिरनेनानुभूयत इत्यानंदभुक् एषोऽस्य परम आनंद इति श्रुतेः स्वप्नादिप्रतिबोधं चे

प्रज्ञानघन एवानंदमयो ह्यानंदभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः ॥ ५ ॥

तः प्रति द्वारीभूतत्वाच्चेतोमुखः बोधलक्षणं वा चेतो द्वारं मुखमस्य स्वप्नाद्यागमनं प्रतीति चेतोमुखः भूतभविष्यत्ज्ञातृत्वं सर्वविषयज्ञातृत्वमस्यैवेति प्राज्ञः सुषुप्तोऽपि हि भूतपूर्वगत्या प्राज्ञ उच्यते अथवा प्रज्ञप्तिमात्रमस्यैव ॥ ५ ॥ ६ ॥

स्वप्नो जागरितं चेति प्रतिबोधशब्दितं चेतस्तत्प्रतिद्वारभूतत्वं द्वारभावेन स्थितत्वं न हि स्वप्नस्य जागरितस्य वा सुषुप्तद्वारमंतरेणासंभवोऽस्ति तयोस्तत्कार्यत्वादतः सुषुप्ताभिमानी प्राज्ञः स्थानद्वयकारणत्वाच्चेतोमुखव्यपदेशभागित्यर्थः अथवा प्राज्ञस्य सुषुप्ताभिमानिनः स्वप्नजागरितवाप्रतिक्रमाक्रमाभ्यां यदागमनं तत्प्रतिचैतन्यमेव द्वारं न हि तद्व्यतिरेकेण कापि चेष्टा सिध्यतीत्यभिप्रेत्य पक्षांतरमाह बोधेत्यादिना भूते भविष्यति च विषये ज्ञातृत्वे तथा सर्वं मिलित्वापि वर्तमाने विषये ज्ञातृत्वमस्यैवेति प्रकर्षेण जानातीति प्रज्ञः प्रज्ञ एव प्राज्ञः तदेव प्राज्ञपदं व्युत्पादयति भूतेति सुषुप्ते समस्तविशेषविज्ञानोपरमात्कुतो ज्ञातृत्वमित्याशंक्याह सुषुप्तोऽपीति यद्यपि सुषुप्त

विश्वतैजसप्राज्ञानां स्थानत्रयं क्रमेणाभेदं च रतामैक्यमेवं वस्तुतो भवतीत्यत्र हेतुं तत्त्वं विवक्षन्नाह दक्षिणेति श्लोकस्य तात्पर्यं संगृ
ह्णाति जागरितेति न चैकस्यामवस्थायामेकस्मिन्नेव देहे भिन्नत्वमात्मनस्तु हार्दिभिर्योग्यते जाग्रदवस्थायामिति तत्तु देहेष्ववस्थि
तत्त्वात् विशेषणान्तरं तत्रैव व्यवस्थितत्वपदात्मनः सर्वगतस्य तदभिमानित्वं देहाभिमानश्च जागरिते परं संभवति तेनैतस्मा
मेवावस्थायामेकस्मिन्नेव देहे त्रयाणामनुभवात्तेषां मिथो भेदो नास्तीति सिद्धान्तार्थः मुखं द्वारमुपलब्धिस्थानं शरीरमात्रे
दृश्यमानस्य कथमिदमुपलब्धौ विशेषायतनमुपदिश्यते स्थानान्तरापेक्षयास्य प्राधान्यादित्याह प्राधान्येनेति अनुभूयते अथा
न निर्दिष्टेरिति शेषः उक्तेर्थे श्रुतिं संवादयति इन्धइति बृहदारण्यकश्रुतेरुदाहृतायास्तात्पर्यार्थमाह इन्ध इत्यादिना वैराजस्यात्म
नो यथोक्तगुणवत्त्वेपि दृष्टव्यस्तस्य किमायातमित्याशंक्याह चक्षुषि चेति अध्यात्माधिदैवयोरेकत्वादाधिदैविको गुणा

जागरितावस्थायामेव विश्वादीनां त्रयाणामनुभवप्रदर्शनार्थोयं श्लोकः दक्षिणाक्षीति दक्षिणमक्ष्येव मुखं तस्मिन् प्राधा
न्येन द्रष्टा स्थूलानां विश्वोनुभूयते इन्धो ह वै नामैष योयं दक्षिणेक्षन्पुरुष इति श्रुतेः इन्धो दीप्तिगुणो वैश्वानर आदित्यान्तर्गतो

दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः ॥२॥

वैराज आत्मा चक्षुषि च द्रष्टा एकः नन्वसौ हिरण्यगर्भः क्षेत्रज्ञो दक्षिणेक्षिण्यक्षण्यभिमानी यन्ता द्रष्टा चासौ देहस्वामी न भवतो
ऽस्यात्मस्वरूपे ऽप्याध्यात्मिके संभवतीत्यर्थः उक्तमेकत्वमाक्षिपति न भेदान्नभ्युपगमात् एको देवः सर्वभूतेषु गूढ इति श्रुतेः॥
त्विति हिरण्यगर्भः सूक्ष्मप्रपंचाभिमानी सूर्यमंडलान्तर्गतः सूक्ष्मसमष्टिदेहः चक्षुर्गोलकद्वयानुग्राहकः [illegible]
[illegible] संसारिणोर्यान्तरं विराडात्मापि स्थूलप्रपंचाभिमानी सूर्यमंडलात्मकः समष्टिदेहः चक्षुर्गो
लकद्वयानुग्राहकः ततोर्थान्तरमेव स एवं तत्तु अष्टिदेहो दक्षिणे चक्षुषि व्यवस्थितः द्रष्टा चक्षुषोः करणानां नियन्ता कार्यक
रणस्वामी ताभ्यां समष्टिदेहाभ्यामन्यो भ्युपगम्यते तेन देवं समष्टिव्यष्टित्वेनावस्थितजीवभेदादुक्तमेकत्वमयुक्तमित्यर्थः
काल्पनिको जीवभेदो वास्तवो वेति विकल्प्याद्यमंगीकृत्य द्वितीयं दूषयति नेत्यादिना एको हि परो देवः सर्वेषु भूतेषु समष्टि

अपंचीकृतसर्वशरीराभिमानि:

12

[illegible]

उपादानकारां=

एवेति यथोक्तं स्वप्नजागरितस्थानद्वयं प्रविभक्तमित्यर्थः समेदमध्यात्माधिदैवाधिभूतभेदसहितमिति यावत् निमित्तकारणत्वनिय
मेपि प्राचीना निर्विशेषस्तत्र निर्वहन्ती त्याद्यं कचप्रकृतिश्च प्रति ज्ञा दृष्टान्तानुपरोधादिति न्यायान्निमित्तोपादानयोर्जगति न भिन्नत्वमित्ये
वं नियमतः सिद्धमतो विशेषणान्तरमित्याह यत इति प्रभवत्यस्मादिति प्रभवः अध्येतस्मिन्निति प्रथमः नचैतेभूतानामेकत्रोपादाना
दृते संभाविना विस्मर्थः आचार्यैर्मोउक्योपनिषदे पठितत्वात्तद्व्याख्यानश्लोकाच नारणामत्रेत्यादिना कृतं तत्र इत्रेत्यन् प्रमाख्य कारो
व्याकरोति एतस्मिन्निति विम्बस्य विभुत्वे प्रागुक्ताधिदैविकाभेदादवधेयं अध्यात्माधिदैवाभेदे पूर्वोदात्तृतां मुतिस्तु चयिन्तु हि पारः
स्थूलसूक्ष्मकारणोपाधिभेदाज्जीवभेदमाशंक्य तत्रूपेकोपि सन्तं त्रोपाधिभेदमन्तरेण विशेषणमात्रभेदादवान्तरभेदो किरि
त्याह एक एवेति पदार्थानामेवमेवोक्तत्वात्तात्पर्यं श्लोकस्य वक्तव्यमवशिष्यते तदाह पर्यायेणेति यद्यात्मनस्त्रैतन्मा भिवस्था

अत्रैतस्मिन् यथोक्तेर्थे एते श्लोका भवन्ति बहिः प्रज्ञ इति पर्यायेण त्रिस्थानत्वात्सोहमिति स्मृत्या प्रतिसंधानाच्च स्थानत्र

बहिःप्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः १ ॥ ॥

यव्यतिरिक्तत्वमेकत्वं मुक्तत्वमसंगत्वं च सिद्धमित्यभिप्रायः महामत्स्यादिदृष्टान्तश्रुतेः ॥ २ ॥ ॥ ॥ ॥

भाविकं स्थानत्रयं न तर्हि तद्देवं तं व्यभिचरितुमर्हति [illegible] पर्यायेणेति [illegible] न व्यभिचरति चात्मानं स्था
नत्रयं क्रमाक्रमाभ्यां तस्य त्रिस्थानत्वादतज्जह्यतिरिक्तत्वमात्मनः सिद्धं यः स्वप्नः सोहं जागर्मीत्यनुसंधानादेकत्वं तस्यावगत
मेकत्वे न हि स्मृत्या प्रदादावेकत्वमिष्यते धर्माधर्मरागद्वेषादिमलस्य अवस्थाधर्मत्वात्तदतिरेके मुक्तत्वमपि सिध्यति संगस्यापि
वेधत्वेनावस्थाधर्मत्वांगीकारात्तदतिरेकिणात्मद्रष्टुरसंगत्वमपि संगतमेवेत्यर्थः श्रुतिं सिद्धेर्थे श्रुतिमुदाहरति महामत्स्यादीति
महान्मत्स्यो नद्यास्रोतसा प्रकंप्यगतिरतिबली यथोभे कूले नद्याः संचरन् क्रमसंचरणात्ताभ्यामतिरिक्तो न च तस्य कूलद्वयग
तदोषगुणवत्त्वं न चासौ क्वचिदपि सज्जते न चैष पैनातास्रोतोवेगेन भ्रमित परिपतन न क्वचिदपि प्रतिहन्यते तथैवायमात्मा क्रमेण

उक्तमर्थं प्रपञ्चयन्मनोऽपारामावादिति हेतुमुक्तमाचष्टे दर्शनेत्यादिना अविशेषेणाव्याकृतरूपेणेत्यर्थः स्वप्नस्थानं जा
गरिते सुषुप्तमिति शेषः यदुक्तमव्याकृतेन प्राणात्मना हृदये स्वप्नस्थानमिति तत्र प्रमाणमाह प्राणो हीति यो हि प्राणोऽध्या
त्मं प्रसिद्धः स वागादीन्प्राणानात्मनि संहृत्य संहरतीति प्राणस्याध्यात्मं वागादिसंहर्तृत्वमुक्तं अधिदैवं च यो वायुः सूत्रा
त्मा सोऽग्न्यादीनात्मनि संहरतीत्यग्न्यादिसंहर्तृत्वं वायोरुक्तं अध्यात्माधिदैवयोरेकत्वात्प्राणस्य वायोश्च वागादिष्व
ग्न्यादिषु संहर्तृत्वेनाव्याकृतत्वस्य संवर्गविद्यायामुक्तित्वात् अव्याकृतेन प्राणात्मना सुषुप्तप्राज्ञस्यावस्थानमिति युक्त
मेवोक्तमित्यर्थः पूर्वमेव विश्वविराजोरैक्यस्याभिनत्वं च सुषुप्ताव्याकृतयोरेकत्वस्य दर्शितत्वात्तैजसहिरण्यगर्भयो
रनुक्तमभेदं वक्तव्यमिदानीमुपन्यस्यति तैजस इति तत्र हेतुमाह मनःस्थत्वादिति हिरण्यगर्भस्य समष्टिमनोनिष्ठत्वा
त्तैजसस्य व्यष्टिमनोगतत्वात्तयोश्च समष्टिव्यष्टिमनसोरेकत्वात्तदुपहितयोरपि तैजसहिरण्यगर्भयोरेकत्वमुचितमित्यर्थः

दर्शनं स्मरणमेव हि मनःस्पन्दितं तदभावे हृदये वाऽविशेषेण प्राणात्मनावस्थानं प्राणो ह्येवैतान्सर्वान्संवृङ्क्त
इति श्रुतेः तैजसो हिरण्यगर्भो मनःस्थत्वात् लिङ्गं मनः मनोमयोऽयं पुरुष इत्यादिश्रुतिभ्यः ननु व्याकृतः प्राणः

किंच हिरण्यगर्भस्य क्रियाशक्त्युपाधेर्लिं । सुषुप्ते तदात्मकानि करणानि भवन्ति कथमव्याकृतता नैष दोषः ॥ ॥

गात्मतया प्रसिद्धत्वात्तस्य च सामानाधिकरण्यश्रुत्या मनसा सहाभेदावगमान्मनोनिष्ठस्य तैजसस्य युक्तं हिरण्यग
र्भत्वमित्याह लिङ्गमिति किंच पुरुषस्य मनोमयत्वश्रवणात्पुरुषविशेषत्वाच्च हिरण्यगर्भस्य तत्प्रधानत्वाधिगमान्म
न्निष्ठस्तैजसो हिरण्यगर्भो भवितुमर्हतीत्याह मनोमय इति प्राणस्य प्रागुक्तमव्याकृतत्वमाक्षिपति नन्विति सुषु
प्ते हि प्राणो नामरूपाभ्यां व्याकृतो युक्तस्तत्र व्यापारस्योपलम्भेरतिस्पष्टदृष्टत्वादित्यर्थः किंच तस्यामवस्थायां वागादी
नि करणानि प्राणात्मकानि भवन्ति न एतस्यैव सर्वे रूपमभवन्निति श्रुतेरतोऽपि प्राणस्याव्याकृतत्वमयुक्तमित्याह तदात्मका
नीति उक्तन्यायेन प्राणस्याव्याकृतत्वायोगादव्याकृतेन प्राणात्मना सुषुप्तस्यावस्थानमयुक्तमिति निगमयति कथमिति

23

राम १२

सर्वेषु क्षेत्रेषु अवस्थितं क्षेत्रज्ञं मामीश्वरं विद्धि इति भगवतो वचनाज्जीवानामात्यन्तिकभेदासिद्धिरित्याह क्षेत्रज्ञं चेति सर्वेषु भूतेषु
क्षेत्रज्ञस्त्वेवात्मा एकः कथं तर्हि प्रतिभूतं भेदप्रत्ययस्तत्राह अविभक्तं चेति तत्त्वतो विभागे पि देहकल्पनया भेदधीरि
त्यर्थः ननु करणेषु सर्वेषु विभक्तस्य विशेषाद्दक्षिणो चक्षुषि विशेषनिर्देशो युज्यते यद्यपि करणान्तरेभ्यश्चक्षुषि प्राधान्य
मुक्तं तथापि नार्थो दक्षिणाविशेषणेनेति तत्राह सर्वेति श्रुत्यनुभवाभ्यां निर्देशविशेषसिद्धिरित्यर्थः यद्यपि देहदेशभेदे
विभक्तमनुभूयते तथापि कथं जागरिते तैजसोऽनुभूयत इत्याशंक्याह तृतीयपादं आचष्टे दक्षिणेति यथा स्वप्ने जागरिते वा सर्वा
रूपेणाभिव्यक्तमर्थजातं दृष्ट्वानुभवति तथैव जागरिते दक्षिणे चक्षुषि द्रष्टृत्वेन व्यवस्थितः स निकृष्टरूपं दृष्ट्वा पुनर्नि
मीलितात्मोऽहमेव रूपं स्मृत्वोपलब्धिजनितसमुद्बुद्धवासनात्मना मनस्यन्तरभिव्यक्तं स्मरन् वि... तैजसो भवति

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत अविभक्तं च भूतेषु विभक्तमिव च स्थितमिति स्मृतेः सर्वेषु करणेष्वि
शेषेऽपि दक्षिणाक्षिण्युपलब्धिपाटवदर्शनात्तत्र विशेषेण निर्देशो विश्वस्य दक्षिणाक्षिगतो रूपं दृष्ट्वा निमीलिता
क्षस्तदेव स्मरन्मनस्यन्तः स्वप्न इव तदेव वासनारूपाभिव्यक्तं पश्यति यथात्र तथा स्वप्ने अतो मनस्यन्तैजसोऽपि
विश्व एव आकाशे च हृदि स्मरणाख्यव्यापारोपरमे प्राज्ञ एकीभूतो घनप्रज्ञ एव भवति मनोव्यापाराभावात्

तथा च तयोर्भेदा दर्शकाभावतरतीत्यर्थः स्वप्नजागरितयोर्विलक्षणत्वात्तद्दृष्टो विश्वतैजसयोरपि वैलक्षण्यमुचितमि
त्याशंक्याह यथेति जागरिते यथार्थजातं दृष्ट्वा पश्यति तथैव स्वप्नेऽपि तदुपलम्भे तेन ततो नतयोर्वैलक्षण्यसिद्धिरित्यर्थः दि
तीयपादस्य व्याख्यामुपसंहरति अत इति स्थानत्रयेऽद्रष्टृभेदाशंकानिरवकाशेति दर्शयितुमेवकारः तृतीयपादं व्याक
रोति जाग्रत्त्वेवं सुषुप्तिं दर्शयति आकाशे चेति यो विश्वस्तैजसत्वमुपगतः स पुनः स्मरणाख्यस्य व्यापारस्याभावतो हृदयाव
च्छिन्नाकाशे स्थितः सन् प्राज्ञो भवति तल्लक्षणालक्षितो भवतीति न हि तस्य रूपविषयदर्शनस्मरणोपरि तत्त्वविशिष्टाकाप

निविष्टस्य प्राज्ञादयो नरत्वमतस्य एकीभूतो विषयविष
याकाररहितो घनप्रज्ञो विशेषविज्ञानविरहीरूपान्तराहि
तत्तिष्ठतीत्यर्थः

ऽतस्मिन्नव्याकृतेऽस्फुटमेव प्रागुक्तं विशेषणं युक्तमित्याह परिच्छिन्नेति यद्यपि विद्योपाधिरभिव्यक्तिमात्रेणापरकीयः तत्त्वादिविशेष
णमुपपादितं तथापि परिच्छिन्नाभिमानिनामुपाधिप्रधानानां नत्र तत्राध्यस्तानां चोपहितानामव्याकृतेनैकत्वमतोऽपि प्रागु
क्तविशेषणोपपत्तिरित्यर्थः किं चाध्यात्माधिदैवयोरेकत्वमिति प्रागुक्तं हि तुमस्मावाच्युपयुक्तं स्फुटमेव प्राक्ते प्राणात्मन्यव्याकृ
तेऽपयोक्तं विशेषणमित्याह एवोक्तमिति अग्रयणतादिप्राणेन सर्वैरप्यव्याकृतत्वादिविशेषणानामयुक्तेः प्राणशब्दस्य पञ्चवृत्तेर्वा
युविकारे रूढत्वान्नाव्याकृते विषयत्वं रूढिविरोधादिति शङ्कते कथमिति अन्यत्र रूढत्वेऽपि योगेनाव्याकृतवि
षयत्वं प्राणशब्दस्य युक्तमिति परिहरति प्राणबन्धनमिति प्रकरणस्य ब्रह्मविषयत्वात् ब्रह्मणोऽपि प्रकृते वाक्ये प्राणश
ब्दस्य प्रयोगान्नाव्याकृतविषयत्वं तस्य युक्तं प्रकरणविरोधादिति शङ्कते नन्विति प्रकरणस्य ब्रह्मविषयत्वेऽपि ब्रह्मणः

एवोक्तं विशेषणमेकीभूतः प्रज्ञानघन इत्याद्युपपन्नं तस्मिन्नुक्तहेतुत्वाच्च कथं प्राणशब्दत्वमव्याकृतस्य प्राणब
न्धनं हि सोम्य मन इति श्रुतेः ननु तत्र सदेव सोम्येति प्रकृतं सद्ब्रह्म प्राणशब्दवाच्यं नैष दोषः बीजात्मकत्वाभ्युपग
मात् सतः यद्यपि सद्ब्रह्म प्राणशब्दवाच्यं तत्र तथापि जीवप्रसवबीजात्मकत्वमपरित्यज्यैव प्राणशब्दत्वं सतः स
च्छब्दवाच्यता च यदि हि निर्बीजरूपं विवक्षितं ब्रह्माभविष्यत् नेति नेतीत्यतो वाचो निवर्तन्ते अन्यदेव तद्विदितादथो
अविदितादित्यवक्ष्यत् न सत्तन्नासदुच्यत इति च स्मृतेः निर्बीजतयैव चेत्सति लीनानां संपन्नानां सुषुप्तप्रलययोः पुनरुत्था प्र

सह प्रणस्य बीजत्वांगीकारादस्मिन्नपि वाक्ये तन्नैव प्राणपदस्य प्रयोगयुक्तं तस्याव्याकृतविषय ॥ नानुपपत्तिः स्यात्॥
त्वमित्युत्तरमाह नैष दोष इति सप्रवाक्यं प्रपञ्चयति यद्यपीति तत्रेति प्राणबन्धनवाक्ये परमपदे जीवप्रत्यक्षः सर्वस्यैव का
र्यजातस्योपलक्षणं प्रकरणवाक्ययोरुभयोरपि परिशुद्धब्रह्मविषयत्वे काक्षतिरित्याशंक्य परिशुद्धस्य ब्रह्मणः शब्दप्रवृत्ति
निमित्तागोचरत्वान्न प्राणशब्दवाच्यत्वानुपपत्तेर्मैवमित्याह यदि हीति न केवलं निरुपाधिकं निर्विशेषं ब्रह्म वाङ्मनसयोर
गोचरमिति श्रुतेरेव निर्णीयते किं तु स्मृतेरपीत्याह न सदिति किं च कार्यजातं प्रति बीजभूताज्ञानरहितं तत्पारमार्थिकत्वे नैवास्मिन्
करणे ब्रह्म विवक्षितं चेत्तर्हि सता सोम्य तदा संपन्नो भवतीति जीवानां सत्संपत्तिश्रवणाद्ब्रह्मणः सच्छब्दितस्य मुक्तत्वे सुषुप्तादौ न

त्र लीनानामेकीभूतानां जीवानां पुनरुत्थानं नोपपद्यते दृश्यते च पुनरुत्थानं तेन शबलमेव ब्रह्मात्र विवक्षितमित्याह निर्बीजतयेति

24

दे
ब्रह्मणोपसंनिधि

अव्याकृतं हि देशकालवस्तुपरिच्छेदशून्यं प्राणोऽपि सौषुप्तदृष्टस्तथा न हि सौषुप्तदृष्टप्राणतत्कालीनस्य प्राणस्य देशादिपरिच्छेदोऽवग
म्यते तथा च लक्षणाविशेषादव्याकृतप्राणयोरेकत्वमविरुद्धमित्यर्थः तस्मायं प्राणो ममायमिति देशपरिच्छेदप्रतिभानादेकल
क्षणत्वाभावान्न प्राणस्याव्याकृतत्वमित्याशंक्याह यद्यपीति परिच्छिन्नाभिमानवतां मध्ये प्रत्येकं ममायमिति प्राणाभिमाने सति
प्राणस्य यद्यप्यव्याकृतत्वं नैव भवति तथापि सुषुप्तावस्थायां पिंडेन परिच्छिन्नो योऽसौ विशेषस्तद्विषयो योऽयं ममेत्यभिमानस्तस्य नि
रोधस्तस्मिन्भवतीति प्राणोऽव्याकृत एवेति योजना प्रतिबुद्धदृष्टविशेषाभिमानविषयत्वेनाव्याकृतत्वेऽपि सुषुप्तदृष्टात्तदुप
संहारादव्याकृतत्वं प्राणस्याविरुद्धमिति भावः विशेषाभिमाननिरोधे प्राणस्याव्याकृतत्वं कुतो दृष्टमित्याशंक्याह यथेति परिच्छिन्नाभि
मानिनां प्राणलयो मरणे तत्राभिमाननिरोधे प्राणो नामरूपाभ्यामव्याकृतो यथेष्यते तथैव प्राणाभिमानिनोऽपि तदभिमाननि

अव्याकृतस्य देशकालविशेषाभावात् यद्यपि प्राणाभिमाने सति व्याकृतत्वेन प्राणस्य तथापि पिंडपरिच्छिन्नविशे
षाभिमाननिरोधः प्राणो भवतीत्यव्याकृत एव प्राणः सुषुप्ते परिच्छिन्नाभिमानवतां यथा प्राणलये परिच्छिन्नाभि
मानिनां प्राणोऽव्याकृतः तथा प्राणाभिमानिनोऽप्यविशेषापत्तेरव्याकृततासमाना प्रसववीजात्मकत्वं च तदध्यक्ष्ये

रोधेनाविशेषापत्तेः सुषुप्तिस्तत्राव्याकृतता ॥ कोऽव्याकृतावस्थः परिच्छिन्नाभिमानिनामध्यक्षाणां च तेनैकत्वमिति ॥ ॥
प्राणस्य प्राग्युक्तदृष्टान्तेनावैशिष्ट्यात्ततो विशेषाभिमाननिरोधे प्राणस्याव्याकृतत्वं प्रसिद्धमित्यर्थः किंच यथा वैदिकमव्याकृतं जगतः
सर्वबीजं तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतेति श्रुतेः तथा प्राणोऽपि सुषुप्ते जागरित्वप्रयोर्भवतीति बीजं तथा चैका
र्थप्रतिप्रसववीजरूपत्वमविशिष्टमुभयोरिति लक्षणाविशेषादव्याकृतप्राणयोरेकत्वस्य प्रसिद्धिरित्याह प्रसवेति समान
मित्यनुकर्षार्थश्चकारः उपाधित्वभावालोचनया तु मायाव्याकृतयोरभेदमभिधाय उपहितत्वभावालोचनया पितयोरभेदमा
ह तदध्यक्ष्येति अव्याकृतावस्थः सुषुप्तावस्थश्चान्तयोरुपहितत्वभावयोराध्यात्मिकाधिदैविकयोरेकोऽधिष्ठाता चिदात्मा नु रतोऽपि

आचार्यैरनुक्तत्वात्प्रकारत्वातिरिक्तं कुं बृहदारण्यकोपनिषदन्तःप्रज्ञमित्यादिवाक्यदोषान्मैवमित्याह तामिति उक्तन्यायेन वस्तुवद
स्थायामवगतस्य देहे अनुभवाभावात् त्रिधा देहे अवस्थित इति कथमुक्तमित्याशङ्क्याह बीजेति २ विश्वादीनां त्रयाणां त्रिधा दे
हे अवस्थितिं प्रतिपाद्य तेषामेव त्रिधा भोगं निगमयति विश्वो हीति ३ भोगप्रयुक्तां तृप्तिमधुना त्रेधा विभजते स्थूलमिति ४ उ
दाहृतश्लोकयोरर्थस्यान्यापेक्षां वारयति उक्तार्थाविति ५ प्रकृतभोक्तृभोग्यपदार्थद्वयपरिज्ञानस्यावान्तरफलमाह त्रिष्विति
९ वाहं व्याचष्टे जाग्रदादिष्विति भोग्यत्वेनैकत्वेपि त्रैविध्यमवान्तरभेदादुन्नेयं भोक्तुरेकत्वे हेतुमाह सोहमिति योहं सुषुप्तः सो

तामबीजावस्थां तस्यैव प्राज्ञशब्दवाच्यस्य तुरीयत्वेन देहादिसंबन्धरहितां पारमार्थिकीं रूपमनुभवति बीजावस्थापि न किं विरद्धे
ऽवमित्युत्पित्तस्य प्रत्ययदर्शनाहूहे नभूयत एवेति त्रिधा देहे व्यवस्थित इत्युच्यते २ उक्तार्थौ श्लोकौ ३ ४ त्रिषु धामसु जा
ग्रदादिषु स्थूलप्रविविक्तानन्दाख्यं भोज्यमेकं त्रिधाभूतं यश्च विश्वतैजसप्राज्ञाख्यो भोक्तैकः सोहमित्येकत्वेन प्रतिसंधा

विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् आनन्दभुक्तथा प्राज्ञस्त्रिधा भोगं निबोधत ३ स्थूलं तर्पयते विश्वं प्रवि
विक्तं तु तैजसं आनन्दश्च तथा प्राज्ञं त्रिधा तृप्तिं निबोधत ४ त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः वेदैतदुभयं यस्तु
नात्र सूक्ष्मत्वाविशेषात्प्रकीर्तितः यो वेदैतदुभयं भोज्यभोक्तृतयानेकधा भिन्नं स भुञ्जानो न लिप्यते ॥ स भुञ्जानो न लिप्यते ५
भोज्यस्य सर्वस्यैकस्य भोक्तुर्भोज्यत्वात् न हि यस्य यो विषयः स तेन हीयते वर्धते वा न ह्यग्निः स्वविषयं दग्ध्वा काष्ठादि तद्वत् ५

हत्वं प्रयामः पश्चात्प्रमस्त्रमं सोहमिदानीं जागर्मीति एकत्वं प्रतिसंधीयते न च तत्र बाधकमस्तीत्युक्तं भोक्तुरेकत्वमित्यर्थः किंच
ज्ञानं तत्कार्यं च प्रति प्राज्ञादिषु द्रष्टृत्वस्याविशिष्टत्वात् द्रष्टृभेदे च प्रमाणाभावादुक्तं तदेकत्वमित्याह द्रष्टृत्वेति द्वितीयार्धं
विभजते यो वेदेति कथमेतावता भोगप्रयुक्तदोषराहित्यं तत्राह भोज्यस्येति यद्यपि भोक्तुरेकस्यैव सर्वं भोग्यमित्यवगतं तथा
पि कथं सर्वं भुञ्जानो भोगप्रयुक्तदोषवान्न भवतीत्याशङ्क्याह नहीति उक्तमर्थं दृष्टान्तेन स्पष्टयति न ह्यग्निरिति स्वविषयात्का
ष्ठादेरग्निर्न हीयते वर्धते वाग्निरिति संबन्धः ५

ब्रह्मशबल

सुषुप्तादौ मुहुर्ब्रह्मणि संपन्नानामपि पुनरुत्थाने मोक्षस्यानुपपत्तिदोषमाह मुक्तानां चेति न तेषां पुनरुत्थाने हेत्वभावादित्याशंक्य सुषुप्तानां प्रलीनानां च न तर्हि पुनरुत्थाने हेत्वभावस्य तुल्यत्वादित्याह बीजाभावेति ननु अनाद्यनिर्वाच्यमज्ञानं संसारस्य बीजभूतं नास्त्येव पूर्णब्रह्मणोऽपि दोषत्वाभावे ग्रहणं मिथ्याज्ञानं तत्संस्कारा वा अज्ञानशब्दवाच्यत्वादित्याह ज्ञानेति अज्ञोऽहमित्यज्ञानमपरोक्षम् ग्रहणस्य च ग्रहणप्रागभावरूपस्यानापरोक्षत्वमिंद्रियसंनिकर्षाभावादनुपलब्धिगम्यत्वात् भ्रांतितत्संस्कारयोश्चाभावे तत्कार्यत्वादुपादानापेक्षणादात्मनश्च केवलस्यानन्तरेणानुपादानत्वेनानाद्यज्ञानसिद्धिः किंच देवदत्तप्रमातृनिष्ठप्रमाप्रागभावातिरिक्तानादिप्रध्वंसिनी प्रमात्वात् यज्ञदत्तप्रमावत् न च तदभावे सम्यग्ज्ञानार्थवत्त्वं दृष्टिकत्वेन भ्रान्तेः स्वतो निवर्त्यत्वात् संस्कारस्य च सम्यपि सम्यग्ज्ञाने क्वचिदनुवृत्तिदर्शनान्नाग्रहणस्य ज्ञाननिवर्त्यत्वं ज्ञानस्य तन्निवर्तकत्वात् तस्मात् ज्ञानदाह्यं संसारबीजभूतमनाद्यनिर्वाच्यमज्ञानं ज्ञानस्यार्थवत्त्वायाभ्युपगंतव्यमन्यथा ज्ञानानर्थक्यप्रसंगादित्यर्थः तत्त्वमस्यादिवाक्यप्रकरणाभ्यां विवक्षितत्वाभावे फलि

मुक्तानां च पुनरुत्थितिप्रसंगः बीजाभावाविशेषात् ज्ञानदाह्यबीजाभावे च ज्ञानानर्थक्यप्रसंगः तस्मात्सबीजत्वाभ्युपगमेनैव सतः प्राणत्वव्यपदेशः सर्वश्रुतिषु चकारणत्वव्यपदेशो अत एव अक्षरात्परतः परः स बाह्याभ्यन्तरो ह्यजः यतो वा

तमाह तस्मादिति ब्रह्मणः शबलस्यैव प्राकरणिकत्वाह केऽपि ॥ चो निवर्तन्ते नेति नेतीत्यादिना बीजवत्त्वापनयनेन व्यपदेशः

तस्मिन्नेव प्राणादिशब्दप्रयोगं प्राणादिश्च स्याव्याकृतविषयत्वमिति भावः यतो अनाद्यनिर्वाच्याज्ञानशबलस्यैव कारणत्वं ब्रह्मणो विवक्षितं अत एव कारणत्वनिषेधेन परिशुद्धं ब्रह्मानुरूपादिश्यते तद्दर्शयति अत एवेति अक्षरं अव्याकृतं तच्च कार्यापेक्षया परं तस्मात् परो यः परमात्मा स हि कार्यकारणाभ्यामस्पृष्टो वर्तते वा तेषां कार्यमध्यान्तरं कारणमिति तिताभासह तत्कल्पनाधिष्ठानत्वेन वर्तमान त्वाच्च सविशेषत्वं ज्ञानादिसमस्तविक्रियाप्रत्यक्षेन कूटस्थः श्रुतिस्मृतिष्वपदिश्यते यतो ब्रह्मणः सकाशाद्वाचः सर्वाणि मनसा सह अवकाशमप्राप्य निवर्तन्ते तद्ब्रह्मानंदरूपं विद्वान् बिभेतीति नेति नेतीति वीप्सया सर्वमारोपितमपाक्रियते इत्यादिनाऽनेन अस्य त्वादिना कांगत्वात् तेषां बीजत्वनिरासेन शुद्धं ब्रह्मैवापदिश्यते न बीजवच्छबलस्येति विभक्तो व्यपदेशः ॥ ॥ ॥

स्वसाध्यविकलत्वं शंकित्वा परिहरति नहीति विवक्षितं दृष्टान्तमनूद्य दार्ष्टान्तिकमाह यथेत्यादिना प्राणशब्दितं बीजमज्ञातं ब्रह्म स
ल्लक्षणं तदात्मनेति यावत् तदेवमचेतनं सर्वं जगत्प्राणशब्दितेन बीजात्मना स्थितं प्राणो बीजात्मा व्यवहारयोग्यतया जनयतीत्युपसंह
रति इत्यतद् इति चतुर्थपादं प्रतीकमादाय व्याकरोति चेतोंऽशूनित्यादिना रवेरंशवो यथा वर्तन्ते तेन यथा पुरुषस्य स्वरूपं चैतन्यात्मकस्य
चेतोरूपाश्चैतन्याभासाः जीवाश्चेतोंऽशवो निर्दिश्यन्ते तान्पुरुषो जनयतीत्युत्तरत्र संबंधः तेषां चिदात्मकात्पुरुषादनन्यत्वतो भे
दाभावं विवक्षित्वा विशिनष्टि जलार्केति भेदश्चास्तु तेषामुपाधिभेदादित्याह प्राज्ञेति पृथगिति सूचितं पुरुषस्य जीवसर्जं

16

मुत्पत्तेः प्राक् प्राणबीजात्मत्वमेवमस्त्वम् इत्यतः श्रुतिरपि वक्ति ब्रह्म वा इदमग्र आसीदिति सर्वं जनयति प्रा
णः चेतोंऽशून् रश्मिवद् रवेरिव चिदात्मकस्य पुरुषस्य चेतोरूपाः जलार्कसमाः प्राज्ञतैजसविश्वभेदेन देवतिर्य
गादिदेहभेदेषु विभाव्यमानाश्चेतोंऽशवो ये तान् पुरुषः पृथक् विषयभावविलक्षणान् अग्निविस्फुलिंगवत्स
लक्षणान् जलार्कवच्च जीवलक्षणांस्त्वितरान् सर्वभावान् प्राणो बीजात्मा जनयति यथोर्णनाभिः यथाग्नेर्विस्फु
लिंगा इत्यादिश्रुतेः ॥६॥

नेहेतुं कथयति विषयेति यथाग्निना समानरूपा विस्फुलिंगा जन्यन्ते तथा चिदात्मना स
वाजी मानस्वभावास्तेनोत्पाद्यन्ते विषयविलक्षणत्वात्प्राणेन बीजात्मना तेषामुत्सारं तेन चोत्पाद्यानां जीवानां उत्सारकाच्चिदा
त्मनः ततो भिन्नत्वं जलपात्रप्रतिबिंबितादित्यादीनां बिंबभूतात्ततस्तत्त्वतो भेदाभावात्तान् बिम्बादीन् पुरुषश्चित्प्रधानो ज मा०
नयतीत्यर्थः विषयभावेन व्यवस्थितान् पुनर्भावान्प्राणो जनयतीति तृतीयपादार्थमुपसंहरति इतरानिति ॥६॥ ॥ १९

एवं योनिरित्यत्र प्राज्ञस्य प्रपंचकारणत्वं प्रतिज्ञातं तत्र सत्कार्यं असत्कार्यं प्रतिवा कारणात्तमिति संदेहे हेनिर्द्धारयितुमारभते प्रभवइति तत्त्वां
तरभेदमाह सर्वमिति पुरुषो हि सर्वमचेतनं जगदुपाधिभूतेन मः प्रधानेन गृहीत्वा जनयति अतएव पुरुषे कारणाविशेषणपदं पुरुष
ते एवं सच चैतन्यप्रधानमेतत्स्थौ तन्यस्यानुवर्त्तवत्स्थितान् प्रतिबिंबकल्पान् जीवानाभासभूतान् उत्पादयति एवं चेतनाचेतनात्मकमशे
षं जगत् सर्वकीर्णं संपादयतीत्यर्थः ननु सतो भावानां सत्त्वादेव प्रभवो न संभवति अतिप्रसंगादित्याशंक्य पूर्वार्द्धं व्याचष्टे सतामिति से
नाधिष्ठानात्मना विद्यमानानामेव अविद्याकृतेन मायामयमारोपितस्वरूपं तेन प्रभवः संभवतीत्यर्थः असज्जन्मनिरसनमंत्रं तरेण कथं

सतां विद्यमानानां स्वेनाविद्याकृतेन नामरूपमायास्वरूपेण सर्वभावानां विश्वतैजसप्राज्ञभेदानां प्रभवउत्पत्तिः वृद्धिश्च वं आप
त्रेणनतत्त्वेनमायया वापि जायत इति यदि त्वसतामेव जन्मस्यात् ग्रहणाग्रहणे व्यवहार्यस्य ग्रहणाद्वाराभावादसत्वप्रसंगः इतरच्चानुस

प्रभवः सर्वभावानां सतामिति विनिश्चयः सर्वं जनयति प्राणश्चेतोंऽशून्पुरुषः पृथक् ॥ ६ ॥ ॥

पोर्दीनामविद्याकृतमायावीजोत्पन्नानां रज्ज्वाधात्मनासत्वं न हि निरास्पदा रज्जुसर्पमृगतृष्णिकादयः क्वचिदुपलभ्यंते के
नचित् यथा रज्ज्वां प्राक् सर्पोत्पत्तेः रज्ज्वात्मना सर्पः सन्नेवासीदेवं सर्वभावानां ॥ ॥ ॥ ॥

सज्जन्मनिर्द्धारयितुं पक्षमित्याशंक्याह वदन्तीति जन्मनः एवं सर्वस्य सत्त्वे च कारणव्यापारसाफल्यासिद्धेर्मिथ्यात्वे च कथं सतो मे
व प्रभवो भावानामित्याशंक्याह यदीति ॥ कार्यप्रपंचस्यासत्त्वे कारणस्य ब्रह्मणः स्वात्मन्यव्यवहार्यत्वाभावात्तस्य ग्रहणोपायरभ
तस्य लिंगस्याभावादसत्त्वमेवं सिद्धेत् कार्येण हि लिंगेन कारणं ब्रह्मास्तीत्यनुमीयते अवगम्यते ते शून्यसत्त्वे भवेन्नत्तस्य कारणेन संबंधो
प्र ऽस्मत्सदेवकारणमेष्टव्यमित्यर्थः कार्यकारणयोरुभयोरपि भवेत्वसत्त्वमित्याशंक्याह द्वयंचेति अविद्याख्यनाद्यनिर्वाच्य पाशो
तास्थैते मायावीजादुत्पन्नाः अस्ते यामविद्यैव मायेत्संगीकारात् तथा रज्ज्वादौ कल्पितसर्पादीनामधिष्ठानभूतरज्ज्वादिरूपेणसत्त्वं

27

सृष्टिचिंतकानामेव सृष्टिविषये विकल्पांतरमुत्थापयति इच्छामात्रमिति ज्योतिर्विदां कल्पनाप्रकारमाह कालादिति परमेश्वरस्ये
च्छामात्रं सृष्टिरित्यत्र हेतुमाह सत्येति यथा लोके कुलालादेः संकल्पनामात्रं घटादिकार्यं न तदतिरेकेण घटादिकार्यसृष्टिरिष्टा न
मनःसृष्ट्याद्यनंतरमेव कार्यं संकल्प्य बहिस्तन्निर्माणाभ्युपगमात् तथा भगवतः सृष्टिः संकल्पनामात्रान्न तदतिरिक्ता काचिदस्तीति के
षांचिदीश्वरवादिनां मतमित्यर्थः ८ यद्यपि तथापि तु सृष्टिस्तस्यास्तु किं प्रयोजनमिति तत्र विकल्पद्वयमाह भोगार्थमिति सिद्धांत
माह देवस्येति किं स्वभावो नाम तस्य केनैसर्गिको परोक्षो मायाशब्दार्थस्तस्येत्याह आप्तमिति पूर्वपक्षाणामपवादं सूचयति आप्तमे
ति देवस्य परमेश्वरस्य स्वभावः सृष्टिरिति स्वभावपक्षे नैसर्गिकमायाविनिर्मिता सृष्टिरिति मतं सिद्धांतत्वेनाभिप्रेत्य चतुर्थपादेन दूष
णमुच्यते पक्षयोरनयोरिति योज्यं ईश्वरस्येश्वरत्वापन्ने सृष्टिरित्येकः पक्षः स्वप्नस्वरूपा माया सद्रूपा वा सृष्टिरिति पक्षद्वयमीश्वरे
च्छासत्यसंकल्पस्य सृष्टिरिति पक्षांतरं कालादेव जगतः सृष्टिर्नेश्वरादीश्वरस्तूदासीनः तत्र विकल्पांतरं भोगार्थं क्रीडार्थं वा सृष्टि
भोगार्थं क्रीडार्थमिति चान्ये सृष्टिं मन्यते अनयोः पक्षयोर्दूषणं देवस्यैष स्वभावोऽयमिति देवस्य स्वभावपक्षमाश्रित्य सर्वे

भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ॥९॥ ० ॥

षां वा पक्षाणां आप्तकामस्य का स्पृहेति ९ नहि रज्ज्वादीनामविद्यास्वभावव्यतिरेकेण सर्पाद्याभासत्वे कारणं शक्यं वक्तुं ॥ ९ ॥

ति फलगतं विकल्पद्वयं तेषां सर्वेषामेव पक्षाणां दूषणं चतुर्थपादेनोक्तमिति पक्षांतरमाह सर्वेषामिति न खल्वाप्तकामस्य परस्यात्म
नो मायां विना विभूतिस्थापनमुपयुज्यते न च स्वप्नमायाभ्यां स्वरूपमंतरेण स्वप्नमायासृष्टिरेष्टा न क्वचित् तव रज्जुनोरेव तयोरुत्पत्तिप्रयो
गात् न च परमानंदस्वभावस्य परस्य विनाभावा मिथ्या संगच्छ[illegible] ॥ ९ ॥ [illegible] तेन नहि तस्य स्वतो विक्रिया स्पृहादि
भावकं युक्तं न च मायामंतरेण भोगक्रीडे तस्योपपद्येते ततो मायामयी भगवतः सृष्टिरित्यर्थः ॥ ९ ॥ यदुक्तं कालात्प्रसूतिं भूताना
मिति तत्राह नहीति अधिष्ठानभूतरज्ज्वादीनां स्वभावव्यतिरिक्तस्याज्ञानादेव सर्पाद्याभासत्वे तथा परस्य स्वमायाशक्तिवशादाकाशा
द्याभासत्वं आत्मन आकाशः संभूत इति श्रुतेः न तु कालस्य भूतकारणत्वे प्रमाणाभावादित्यर्थः पादत्रये व्याख्याते व्याख्येयत्वेन क्र

मवशात्प्राप्तं चतुर्थपादं व्याख्यातुमुत्तरग्रन्थप्रवृत्तिरित्याह ॥

सष्टं

चेतनाचेतनात्मकस्य जगतः सर्गे प्रस्तुते स्वमतविवेचनार्थं मतान्तरमुपन्यस्यति विभूतिं प्रसवमिति ईश्वरस्य विभूतिर्विस्तारः स्वकीयैश्व र्यख्यापनं सृष्टिरिति पक्षे सृष्टेर्वस्तुत्वं कापायपक्षान्तरमाह स्वप्नेति कुतः सृष्टिचिन्तकानामेतन्मतेनत्वविदामेव किं न स्यात्तत्राह नास्तीति सृष्टेरपि वस्तुत्वात् अस्तु चिन्तकानामपि तत्राद रो भविष्यतीत्याशङ्काह इदमिति मायामपि सृष्टिरादरविषयो न भवतीत्यत्र दृष्टान्तमाह नहीति मायावीत्यादिना दृष्टान्तेन तत्कार्यं गम्यते दृष्टान्तनिविष्टमर्थं दार्ष्टान्तिके योजयति तथैवेति नहि परमार्थचिन्तकानां कुत्रादर इत्याशङ्क्य सृ

विभूतिर्विस्तार ईश्वरस्य सृष्टिरिति सृष्टिचिन्तका मन्यन्ते न तु परमार्थचिन्तकानां सृष्टावादर इत्यर्थः इन्द्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुतेः नहि मायाविनं सूत्रमाकाशे निक्षिप्य तेन सायुधमारुह्य चक्षुर्गोचरतामतीत्य युद्धे न खण्डशः छिन्नं पतितं पुनरुत्थितं च पश्यतां तत्कृतमायादिसतत्त्वचिन्तामायादरो भवति तथैवायं मायाविनः सूत्रप्रसारणसमः सुषुप्तस्वप्नादिविकासस्तदारूढमायाविसमश्चतस्यः प्राज्ञतैजसादिः सूत्रे तदारूढाभ्यामन्यः परमार्थमायावी स एव भूमिष्ठो मायाच्छन्नोऽदृश्यमान एव स्थितो यथा

विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता ७ इच्छामा
त्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः ॥८॥ ॥

तथा तुरीयाख्यं परमार्थतत्त्वं च तत्र स्थितायामेवादरो मुमुक्षूणामार्यो रत्नानि निःप्रयोजना यां सृष्टावादरः इत्यतः सृष्टिचिन्तकानामेवैते विकल्पा इत्याह स्वप्नमायासरूपेति स्वप्नरूपा मायासरूपा चेति ॥७॥ इच्छामात्रं प्रभोः सत्यसंकल्पत्वात्सृष्टिर्घटादिः सं

ष्टान्तमुत्तरमाह सत्येत्यादिना मायाच्छन्नत्वमदृश्यमानत्वे हेतुस्तुरीयो ((कल्पनामात्रेण संकल्पनातिरिक्तं कालादेव सृष्टिरिति केचित् ८ स्यजाग्रत्स्वप्नसुषुप्तेष्वपि विश्वतैजसप्राज्ञेभ्यश्चातिरिक्तं तद्दृष्टमिति वेद्युः परमार्थतत्त्वचिन्ता हि सम्यग्धीहारफलवती न सृष्टेस्ततः सृष्टावनादरः स्ततत्त्वनिष्ठानामित्याह नेति परमार्थचिन्तकानां सृष्टावनादरात्परमार्थनिष्ठानामेव चरणो विशेषचिन्तेत्युक्तेर्वैदितीयाद्दुमवतारयति इस्यतं इति जाग्रदादीनानामर्थानामेव वस्तुप्रपञ्चनात्तस्य सत्यत्वं मायायाश्च न तथा पादिलक्षणाः मन्त्रलोकी कारणं दनेयोर्विकस

मां·भा·टी·
१८

28

नापीति विशिष्टरूपेण विषयत्वेपि स्वरूपेणानिरुपाधिकात्मनानंदविषयत्वान्नात्र गवादाविव रूढिरवतरतीत्यर्थः॥ ननु तुरी
यः गवादाविवजातिर्यद्यपि तुरीये सामान्यविशेषभावस्याभिधानुमयोग्यत्वादिति मत्वाह गवादिवदिति नच तुर्थः पाचकादाविव
वाक्रियेतुरीये क्रियावत्वस्य शब्दप्रवृत्तिनिमित्तस्य व्युत्पत्तिसिद्धत्वादित्याह नापिक्रियात्वमिति न पंचमः उत्पलादौ नीलादिशब्द
वन्निर्गुणे तुरीये गुणवत्वस्य शब्दप्रवृत्तिनिमित्तस्य व्युत्पत्तिसिद्धत्वादित्याह नापीति नदेवं तुरीयस्य वाच्यत्वानुमाने शब्दप्रवृत्ति
निमित्तानुपलब्धिबाधितमिति फलितमाह अत इति यदि तुरीयस्य नास्ति विशिष्टजात्यादिमत्वं तर्हि नरविषाणादिवच्छेऽवितद्

नापि प्रमाणांतर विषयत्वं स्वरूपेण गवादिवत् नापि क्रियावत्वं पाचकादिवत् नापि गुणवत्वं नीलादिवत् अतो नाभिधाने
न निर्देष्टुमर्हति शशविषाणादिसमत्वान्निरर्थकत्वं तर्हि नेत्यात्मत्वावगमे तुरीयस्य अनात्मतृष्णाव्यावृत्तिहेतुत्वान्मु
क्तिकावगमे रजततृष्णायाः नहि तुरीयस्यात्मत्वावगमे सत्यविद्यातृष्णादिदोषाणां संभवोस्ति नच तुरीयस्यात्मत्वा
नवगमे कारणमस्ति सर्वोपनिषदां तादर्थ्येनोपक्षयात् तत्त्वमसि अयमात्मा ब्रह्म सत्यं ज्ञानमनंतं ब्रह्म आत्मायत्साक्षादपरोक्षा

छेरपि निष्फलत्वं विशिष्टजात्यादिमतो गजादेरुपासनस्य फलवत्वो १ सर्वो ह्यं सर्वतो मुख्य अन्यस्य वेदं सर्वमित्यादीनां॥ ॥

पत्वेभादिति शंकते शशविषाणादीतिपथ शुक्तिरियमित्यवगमे रजतादिविषयतृष्णाव्यावर्त्यते तथा तुरीयं ब्रह्माहमित्या
त्मत्वेन तुरीयस्य साक्षात्कारे सत्यनात्मविषयातृष्णाव्यवच्छिद्यते तदेवमात्मत्वेन तुरीयावगमस्य सर्वाकांक्षानिवर्तकत्वा
न्नर्थकत्वाशंकानयुक्तेति परिहरति नेत्यादिना तुरीयस्यात्मत्वावगमे सति सर्वानर्थहेतु तृष्णादिदोषनिवृत्तिलक्षणं फलमु
क्तं विद्वदनुभवेन साधयति नहीति ननु तुरीयमशेषश्रुत्यंतात्मत्वेनावगंतुमशक्यते तद्वत्वभावादिति तत्राह नचेति सर्वोप

राम·
१८

चतुर्थ इति ननु पादत्रयवद्विधिमुखेनैव चतुर्थः पादोपि व्याख्यायतां किमिति निषेधमुखेन व्याख्यायतेतत्राह सर्वेति सर्वाणि शब्दप्रवृत्तिनिमित्तानि विषयीगुणादीनि तैः शून्यत्वात्तुरीयस्य वाच्यत्वायोगान्निषेधद्वारैव तन्निर्देशः संभवतीत्यर्थः सा द्यादृश्यत्वाभावं योतयितुं निर्दिदिक्षति तुकं यदि चतुर्थं विधिमुखेन ननिर्देष्टुं शक्यं तर्हि शून्यमेव तदापद्येत तन्निषेधेनैव निर्दिश्यमानत्वात् यथा विधेना स्पर्धवादि तिशंकते शून्यमेवेति ननु तुरीयस्य शून्यत्वमनुमातुं युक्तं विमतं सदधिष्ठानं कल्पितत्वात्तथा विधरजतादिवदित्यनुमानात्तुरीयस्य शून्यत्वमसत्वसिद्धिरित्युत्तरमाह तन्नेति दृष्टांतं साधयति नहीति रजतादीनां सदनुविद्धबुद्धिप्रबोधत्वादवस्त्वास्पदत्वायोगान्तद्वदेव प्राणादिविकल्पानामपि नावस्त्वास्पदत्वं सिध्यतीत्यर्थः ॥ यद्यधिष्ठानत्वं तुरीयस्येष्टं तर्हि वाच्यत्वमधिष्ठानत्वात् घटादिवदि

चतुर्थः पादः क्रमप्राप्तो वक्तव्य इत्याह नांतः प्रज्ञमित्यादि सर्व शब्दप्रवृत्तिनिमित्तशून्यत्वात्तस्य शब्दानभिधेयत्वमिति विशेषप्रतिषेधेनैव चतुरीयं निर्दिदिक्षति शून्यमेव तर्हि तन्नमिथ्याविकल्पस्य निर्निमित्तत्वानुपपत्तेः नहि रजतसर्पपुरुषमृगतृष्णिकादि विकल्पाः शुक्तिरज्जुस्थाणूषरादिव्यतिरेकेणावस्त्वास्पदाः शक्याः कल्पयितुं एवं तर्हि प्राणादिसर्वविकल्पास्पदत्वात्तुरीयस्य शब्दवाच्यत्वमिति न प्रतिषेधैः प्रत्याय्यत्वमुदकाधारादेरिव घटादेः नप्राणादिविकल्पस्य सत्वात् शुक्तिकादिष्विव रजतादेः नहि सदसतोः संबंधः शब्दप्रवृत्तिनिमित्तभाग्वस्तुत्वात् ॥

ति प्रक्रमभंगः स्यादिति चोदयति एवं तर्हीति किं प्रातिभासिकमधिष्ठानत्वं हेतूकृतं किं वा तात्विकं नाद्यः तस्य तात्विकवाच्यत्वासाधकत्वादतात्विके तु वाच्यत्वे प्रक्रमो न विरुद्ध्यते न द्वितीयः शुक्त्यादिषु कल्पित रजतादेरवस्तुत्ववत्तुरीये कल्पितप्राणादेरवस्तुतात्त्वात्तात्विकाधिष्ठानत्वस्य तात्विकत्वायोगादिति दूषयति नप्राणादीति किं च वाच्यत्वे तुरीयस्याभिरुच्यमाने तत्र शब्दप्रवृत्तिनिमित्तं वक्तव्यं तच्च षष्ठीरूढिर्वा जातिर्वा क्रिया वा गुणो वेति विकल्प्य प्रथमं प्रत्याह नहीति तुरीयातिरिक्तस्यावस्तुत्वात्तस्य तुरीयस्य च

अन्यथाख्यत्वं तभिन्नयोर्मिथः संस्पर्शाविरहितो अन्यायोपिप्रमाणायोगात्तुरीयप्रतिपत्तौ विशिष्टस्यहेतुत्वाभावादन्यस्य च तत्प्रतिपत्तिहेतुरस्याद्दर्शनात्तुरीयाप्रतिपत्तिरेवस्यादित्यर्थः शास्त्रात्तत्प्रतिपत्तिः स्यादितिचेन्नेत्याह शास्त्रेति तद्धितिष्ठरूपमनूद्यविशेषणशास्त्रं योद्देनतस्यतुरीयत्वमुपादिशतिभेदेचास्यतिकेतदानर्थक्यान्न शास्त्रात्तत्प्रतिपत्तिरित्यर्थः मानतो हितुरीयप्रतिभूदितिचेत्तत्राह अन्येति विशिष्टस्येवप्रतिपत्त्यातुरीयस्याप्रतिपत्तौ प्रतिपन्नस्यविभ्रमादेर्विशिष्टस्यप्रत्युदस्तत्वादन्यस्याप्रतिपन्नत्वान्नैरात्म्यधीरेवापद्येतेत्यर्थः भेदपक्षेऽप्येतदेतयोक्तदोषवशान्नसंभवतितनहि माभूद्भेदपक्षो विकल्पनिर्वहतो तिचेत्तत्र किंफलं पर्यनुयुज्यते किं वा प्रमाणान्तरमथवा साधनान्तरमिति विकल्प्याद्यं दूषयति रज्जुरिवेति यथा रज्ज्वां विकल्पितानां तासर्पधारादिविविधविकल्पानां तथा एक एवात्मा स्थानत्रयेऽपि परोऽतः प्रज्ञत्वादिनाविकल्प्यमानो बहुधा समस्तेन तद्दर्शनं तदनुवादे

शास्त्रोपदेशानर्थक्यं शून्यतापत्तिर्वा रज्जुरिव सर्पादिभिर्विकल्प्यमानात्मा स्थानत्रयेऽपि स्थित्वात्मैक एवांतः प्रज्ञादित्वेन विकल्प्यते यदा तदांतः प्रज्ञादित्वप्रतिषेधविज्ञानप्रमाणसमकालमेवात्मन्यनर्थप्रपंचनिवृत्तिलक्षणफलं परिसमाप्तमिति तुरीयाधिगमे प्रमाणान्तरं साधनान्त[illegible]रं वा न मृग्यं रज्जुसर्पविवेकसमकाल इव रज्ज्वां सर्पनिवृत्तिफले सति रज्ज्वधिगमस्य ॥

मंतः प्रज्ञत्वादिप्रतिषेधजनितं यत्प्रमाणरूपं विज्ञानं तद्धुत्वा समानकालमेवात्मन्यनर्थनिवृत्तिरूपं फलं सिद्धमिति न फलपर्यनुयोगोऽवकाशवानित्यर्थः शुद्धस्य संस्पर्शपरोक्षज्ञानहेतोरसंस्पर्शापरोक्षज्ञानहेतुत्वायोगात्तुरीयज्ञाने प्रमाणान्तरमेष्टव्यमिति पक्षं प्रत्याह तुरीयेति तस्य हि साक्षात्कारि न शब्दातिरिक्तं प्रमाणमन्वेष्यं शब्दस्य विषयानुसारेण प्रमाहेतुत्वाद्विषयस्य तुरीयस्यापि संस्पर्शापरोक्षत्वादित्यर्थः तुरीयसाक्षात्कारि प्रसंख्यानाख्यं साधनान्तरमेष्टव्यमिति पक्षं प्रति क्षिपति साधनान्तरं चेति प्रसंख्यानस्याप्रमाणत्वान्न प्रमारूपसाक्षात्कारं प्रति हेतुतेति भावः यथा रज्जुरियं सर्पो नेति विवेकधीसमुदयदशायामेव रज्ज्वां सर्पनिवृत्तिफले सिद्धे रज्ज्वो

निषेधमुखेनैव तुरीयस्य प्रतिपादनं न विधिमुखेनेत्युपपादयिष्यमाणानुवादपूर्वकमुत्तरग्रन्थमवतारयति सोऽयमित्यादिना बीजाङ्कुरस्थानी-
यमित्यस्यार्थो हेतुहेतुमद्भावेन व्यवस्थितमित्यर्थः अबीजात्मकं कार्यकारणविनिर्मुक्तमित्येतावत् तत्र हेतुं सूचयति परमार्थेति तस्य वि-
धिमुखेनानिर्देश्यानुपपत्तिं शङ्कामभिप्रेत्याह सर्पादीति किमुत्तरेण ग्रन्थेन तुरीयं प्रतिपाद्यते किं वा तस्य स्थानत्रयवैलक्षण्यं वि-

तुरीयव्यतिरेका तेः

वक्ष्यते प्रथमे प्रतिपादकस्य विधानाद्व्यतिरेकादस्य निषेधानर्थक्यं हि नीयेऽपि तदानर्थक्यमापद्येतेत्यनुक्तेर्वोक्तादन्यत्वसिद्धेरिति म-
न्वानः शङ्कते नन्विति न तावत्तुरीयं विधिमुखेन बोध्यं तस्य स्वप्रकाशत्वात्तस्मिन्प्रकाशानुदयात् तथापि समारोपितविश्वादिरूपेण प्र-

सोऽयमात्मा परमार्थापरमार्थरूपश्चतुष्पादित्युक्तः तस्यापरमार्थरूपमविद्याकृतं रज्जुसर्पादिसममुक्तं पादत्रयलक्ष-
णं बीजाङ्कुरस्थानीयम् अथेदानीमबीजात्मकं परमार्थस्वरूपं रज्जुस्थानीयं सर्पादिस्थानीयोक्तस्थानत्रयनिराकरणे-
नाह नान्तःप्रज्ञमित्यादि नन्वात्मनश्चतुष्पात्त्वं प्रतिज्ञाय पादत्रयकथनेनैव चतुर्थस्यान्तःप्रज्ञादिभ्योऽन्यत्वे सिद्धे नान्तःप्र-
ज्ञमित्यादिप्रतिषेधोऽनर्थकः न सर्पादिविकल्पप्रतिषेधेनैव रज्जुस्वरूपप्रतिपत्तिवत् त्र्यवस्थस्यैवात्मनस्तुरीयत्वेन प्रतिपि- व
पादयिषितत्वात् तत्त्वमसीतिवत् यदि हि त्र्यवस्थात्मविलक्षणं तुरीयमन्यत्तत्प्रतिपत्तिद्वाराभावात् ॥

तिपन्नं तन्निषेधेन बोध्यते न तदनिषेधेनास्य यथावद्ग्रहणादतो न निषेधानर्थक्यमिति परिहरति न सर्पादीति तुरीयस्य पादत्रय-
विलक्षणस्यार्थादेव सिद्धावपि जीवात्मनः स्थानत्रयविशिष्टस्य तुरीयं ब्रह्मस्वरूपमिति नोपदेशमन्तरेण सिध्यतीति तुरीयं ग्रन्थोऽर्थवानि-
त्यर्थः यथा विधिमुखेन प्रवृत्तेन तत्त्वमसीति वाक्येन स्थानत्रयसाक्षिणः त्वंपदलक्ष्यस्य तत्पदलक्ष्यब्रह्मतात्मकता प्रबोध्यते तथा च निषे-
धद्वारेणापि तस्य स्वरूपत्वाज्जीवस्य तुरीयब्रह्मत्वं प्रतिपादयितुमिष्टमित्याह तत्त्वमसीति ननु स्थानत्रयविशिष्टस्यात्मनोऽन्यदेव तुरीयात्म-
त्वं तुरीयं ग्रन्थेन प्रतिपाद्यते तुरीयस्य विशिष्टात्मलक्षणत्वेनात्यन्तभिन्नत्वात् तत्राह यदि हीति प्रातिभासिकवैलक्षण्येऽपि विशिष्टोपलक्ष्य-

[illegible]

णां मानजन्यफलसंविदनपेक्षत्वादित्युक्तं तच्चैव हेत्वंतरमाह अंतःप्रवृत्त्वादीति आश्रयाभावेनाश्रितप्रमाणाभावाद
नंतरक्षणोत्तस्यव्यापारानुपपत्तिरित्यत्र वाक्यशेषमनुकूलयति तथाचेति किंच ज्ञानाधीनेहेतुनिवृत्त्यवच्छिन्नक्षणा
तिरेकेणानक्षणांतरे ज्ञानंस्यात्तु पारयति नचास्थिरं ज्ञानं व्यापाराय पर्याप्तं तथाच ज्ञानस्य हेतुनिवृत्तिव्यतिरेकेणा
नात्मनि व्यापारोस्तीत्याह ज्ञानस्येति ननु ज्ञानं हेतुनिवर्त्तकमपि न स्वात्मानं निवर्त्तयति निवर्त्त्यनिवर्त्तकभावस्यैकत्र

२० विज्ञानप्रमाणस्यानुपादित्सितांतः प्रवृत्त्यादिनिवृत्तिव्यतिरेकेणातुरीयव्यापारोपपत्तिः अंतःप्रवृत्त्यादि
निवृत्तिसमकालमेव प्रमातृत्वादिभेदनिवृत्तेः तथाचवक्ष्यति ज्ञाते हेतुतन विद्यत इति ज्ञानस्य हेतुनिवृ
त्तिसमक्षणव्यतिरेकेणाक्षणांतरानवस्थानात् अवस्थानेचानवस्थाप्रसंगात् हेतुतोनिवृत्तिः॥ ॥

विरोधादतो यावन्निवर्त्तकं स्यात्स्यतितत्राह अवस्थाने चेति निवर्त्तकस्य ज्ञानस्य हेतुनिवृत्तेरनंतरमपि निवर्त्तकांतरम
पेक्ष्यावस्थाने च तस्यतस्य निवर्त्तकांतरसापेक्षत्वादाद्यस्यापि विज्ञानस्य निवर्त्तकत्वासिद्धिः नच ज्ञानस्य स्वनिवर्त्तक
त्वानुपपत्तिः स्वपरविरोधिनां भावानां बहुलमुपलंभादित्यर्थः ज्ञानस्य जन्मातिरिक्तव्यापाराभावात्तज्जन्मन एव हेतुनि एम॰
वेधेनैवोपक्षयात्क्षणांतरे विषयस्फुरणाजननायानवस्थानादारोपितातद्भेदनिवृत्त्यैव ज्ञानं पर्यवसितमित्युपसंहर २०
दनवस्थानस्य स्वनिवर्त्तकत्वांगीकारे विज्ञानत्वाविशेषा ३
ति॥

विषयगतं प्राकट्यं प्रमाणफलं नाध्यस्तनिवृत्तिरित्याशंक्याह येषामिति तु विषयाज्ञानापनयनाय ब्रह्मणा प्रमाणं किं पात्यवि
षये भावरूपमतिशयमाधत्ते चेदयनपाय्यं किं पात्याविशेषात् छिदिरपि छेद्यसंयोगापनयजातिरिक्तमतिशयमादधाति न्न
च संयोगविनाशातिरिक्ते विभागे संप्रतिपत्तिरस्ति प्राकट्यस्य च प्रकाशत्वे ज्ञानवन्नार्थनिष्ठत्वम प्रकाशत्वे तेनार्थेनानायो
स्तीति भावः अज्ञाननिवर्तकमेव प्रमाणमिति पक्षे विषयस्फुरणोकारणाभावाद्धि विषयसंवेदनेन स्यादित्याशंक्याह प
देति घटोऽहितमसा समावृतो व्यवहारायोग्य इति तिष्ठति तस्य तमसो निःक्रमस्य व्यवहारयोग्यत्वापादने प्रत्यक्षादिप्रमाणोऽप्रव
र्तते तज्ज्ञानुपादित्सितस्यानिष्टस्याप्रमेयस्य तमसो निवृत्तिस्तस्योपदानपर्यवस्यतीति तदाघट संवेदनमार्थिकं प्रमाणफलं

येषां पुनस्तमोपनयव्यतिरेकेण घटाधिगमे प्रमाणो व्याप्रियते तेषां छेद्यावयवसंबंधवियोगव्यतिरेकेणा
न्यतरावयवे पिच्छिदिर्व्याप्रियत इत्युक्तं स्यात् यदा पुनर्घटतमसोर्विवेककरणे प्रवृत्तं प्रमाणमनुपादित्सितत
मसो निवृत्तिफलावसानं छिदिरपि छेद्यावयवसंबंधविवेककरणे प्रवृत्ता तदवयवद्वैधीभावफलावसाना त
दानान्तरीयकं घटविज्ञानेन तत्प्रमाणफलं न च तद्वदस्यानन्यथात्वोपितातः प्रवृत्त्यादिविवेककरणे प्रवृत्तस्य प्र

न भवतीति यथा छिदिक्रियाछेद्यस्यान्तरावयवयोर्मिथः संयोगनिरसने प्रवृत्ता सतितयोरेव छेद्यावयवयो ॥त्येष॥
द्वैधीभावफले पर्यवस्यति न त्वन्यतरावयवे पि छिदिर्व्याप्रियते न घेहापितमो निवृत्तौ प्रमाणं निवृत्तौ तिघटस्फुरणं त्वा
र्थिकं न च तत्स्यापित्वमभिव्यञ्जकैः प्रमाणव्यापारैस्यास्थिरत्वादित्यर्थः किं च घटादेर्जडस्य संविदभेदात्तत्र संविदोऽभा
न फलत्वेपि नात्मन्यजडे संविदेकतानेमानस्यारोपितधर्मनिवर्तकत्वमन्तरेण संविज्जनकत्वव्यापारः संभवतीत्याह
नचेति तुरीयात्मनि संवेदजनने व्यापारेण प्रमाणस्य प्रकल्प्यते तस्य संविदात्मकत्वादारोपितनिवृत्तिव्यतिरेकेण ॥ ॥

निवर्तते =

कं तदेव वदेतु कथमज्ञानेंद्रियाविषयत्वमाह अत एवेति दृष्टस्यैवार्थक्रियादर्शनाददृष्टत्वादर्थक्रियाराहित्यमिति विशेषणांतरमाह य
स्मादिति अदृष्टमित्यनेनाग्राह्यमित्यस्य पौनरुक्त्यं परिहरति कर्मेंद्रियैरिति अलक्षणमित्ययुक्तं सत्यं ज्ञानमनंतमित्यादिलक्ष
णोपलंभादित्याशंक्याह अलिंगमिति कोस्यैवान्यात्मकः प्राणादित्यादिलिंगोपन्यासविरुद्धमेतदित्याशंक्याह अननुमेयमिति
प्रत्यक्षानुमानाविषयत्वं प्रयुक्तं विशेषणांतरमाह अत एवेति मनोविषयत्वाभावादेव शब्दाविषयत्वं शब्दप्रवृत्ते तत्प्रवृत्तिपूर्व
कत्वादित्याह अत एवेति तर्हि यथोक्तं वस्तु नास्त्येव प्रमाणाभावादित्याशंक्याह एकात्मेति परोक्षार्थविषयतया विशेषणांवा

विज्ञातेर्विपरिलोपो विद्यत इति च श्रुतेः अत एवादृष्टं यस्माददृष्टं तस्मादव्यवहार्यमग्राह्यं कर्मेंद्रियैः अलक्षणं अलिंगमि
त्येतत् अननुमेयमित्यर्थः अत एवाचिंत्यं अत एवाव्यपदेश्यं शब्दैः एकात्मप्रत्ययसारं जाग्रदादिस्थानेष्वेकोयमात्मेत्यव्य

मचिंत्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपंचोपशमं शांतं शिवमद्वैतं चतुर्थं मन्यंते ॥ ७ ॥

भिचारी यः प्रत्ययस्तेनानुसरणीयं अथवा एक आत्मप्रत्ययः सारं प्रमाणं यस्य तुरीयस्याधिगमे तत्तुरीयमेकात्मप्रत्ययसा
रं आत्मेत्येवोपासीतेति श्रुतेः अतः प्रज्ञत्वादिस्थानिधर्मप्रतिषेधः कृतः प्रपंचोपशममिति जाग्रदादिस्थानधर्माभाव उच्य

त्यायाः परोक्षार्थं तथापि व्याकरोति अथवेति ॥ ते अत एव शांतमविक्रियं शिवं यतोऽद्वैतं भेदविकल्परहितं चतुर्थं तुरीयं मन्यंते।
परोक्षात्मप्रत्ययस्यात्मनि प्रमाणत्वे हृद्वारत्वेन श्रुतिमुदाहरति आत्मेत्येवेति पञ्चाप्रोनोत्यादिना परिसरणत्वादिलक्षणा
त्वावदात्मोक्तः स च वाङ्मनसातीतः श्रुतिभ्योऽवगतस्तमेवैकरसं परमात्मानं प्रत्यक्त्वेन गृहीत्वा तन्निष्ठतां सात्मेनोवस्थानात्र यानी
तस्य तुरीयस्यापरोक्षनित्यदृष्टित्वं श्रुतितो दृष्टमित्यर्थः विशेषणांतरस्य पुनरुक्तिं परिहरन्नर्थभेदमाह अत इति स्थानिधर्मस्य
स्थानधर्मस्य च प्रतिषेधात् शब्देन पराम्रष्टं शांतं रागद्वेषादिरहितमविक्रियं कूटस्थमित्यर्थः शिवं परिशुद्धं परमानंदबोधरूप

तस्मादिति प्रतिषेधजनितं विज्ञानमेवं प्रमाणं तस्य व्यापारो जन्मैव तेन समानकालो वानर्थनिवृत्तिरिति योजना तत्र हेतुमाह
बीजभावेति सुषुप्ते हि स्वप्नजागरितेषु प्रतिबीजभावः तस्य शेषविशेषविज्ञानाभावरूपत्वात् शेषविज्ञानानां सर्वं घनमेकं सा
धारणमविभक्तं सुषुप्तमिति तत्प्रतिषेधेनेत्यादिना संभवतीत्यर्थः प्रकृतसर्पादीनां रज्ज्वादौ ध्वंसि प्रतिपन्नानां प्रतिषेधादस
त्वमात्मनि तु प्रमाणेनागम्यमानानामतः प्रज्ञत्वादीनां न प्रतिषेधो युज्यते मानविरोधादिति शंकते कथमिति प्रामाणिकत्वस्य
सिद्धत्वाद्युक्तमतः प्रज्ञत्वादीनामसत्यत्वमिति परिहरति उच्यत इति विमतमसत्यं व्यभिचारित्वात्संप्रतिपन्नवदित्याह रज्ज्व

तस्मात्प्रतिषेधविज्ञानप्रमाणव्यापारसमकालो वात्मन्यध्यारोपितानां तः प्रज्ञत्वाद्यनर्थनिवृत्तिरिति सिद्धं नान्तःप्रज्ञमिति तैज
सप्रतिषेधः न बहिःप्रज्ञमिति विश्वप्रतिषेधः नोभयतःप्रज्ञमिति जाग्रत्स्वप्नयोरंतरालावस्थाप्रतिषेधः न प्रज्ञानघनमिति
सुषुप्तावस्थाप्रतिषेधः बीजभावाविवेकरूपत्वात् न प्रज्ञमिति युगपत्सर्वविषयप्रज्ञातृत्वप्रतिषेधः नाप्रज्ञमिति अचैतन्य

नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनः न प्रज्ञं नाप्रज्ञं अदृष्टमव्यवहार्यमग्राह्यमलक्षणं॥

प्रतिषेधः कथं पुनरंतःप्रज्ञत्वादीनामात्मनि गम्यमानानां रज्ज्वादौ सर्पादिवत्प्रतिषेधादसत्त्वं गम्यत इति उच्यते ज्ञस्वरूपावि
शेषेपीतरेतरव्यभिचारात्सत्त्वं रज्ज्वाद्यविव सर्पधारादिविकल्पितभेदवत् सर्वत्राव्यभिचारात् ज्ञस्वरूपस्य सत्यत्वं सु
षुप्तेति तस्याविशेषो व्यभिचारः तत्र रज्ज्वाद्यविवेस्यप्रदाहरणं॥ मेवं व्यभिचरतीति चेन्न सुषुप्तस्यानुभूयमानत्वात् न हि विज्ञातुः॥
मतः प्रज्ञत्वादीनामितरेतरव्यभिचारे निदर्शनं सर्पधारादीति विमतं सत्यमव्यभिचारित्वाद्रज्ज्वादिवदित्याह सर्वत्रेति तस्य च स
त्यत्वे सर्वकल्पनाधिष्ठानत्वं सिद्धमिति भावः अव्यभिचारित्वहेतोरसिद्धिं शंकते सुषुप्त इति ननु तत्र चैतन्यस्य व्यभिचारः सुषुप्त
स्यास्फुरणादित्याशंक्य तथा साधकस्फुरणस्यावश्यकत्वादित्याह न सुषुप्तस्येति सुषुप्ते साधकस्फुरणस्य सत्त्वे प्रमाणमाह नहीति विज्ञे

२२

विश्वादिष्ववान्तरविशेषनिरूपणद्वारेण तुरीयमेव निर्द्धारयति कार्येति श्लोकस्य तात्पर्यमाह विश्वादीनामिति विश्वतैजसयोरुभयबद्धत्वं
सामान्यं प्राज्ञस्य कारणमात्रबद्धत्वं विशेषः अथैतं निरूपणं कुत्रोपयुज्यते तत्राह तुर्येति प्राज्ञस्य कारणमात्रबद्धत्वं साधयति तत्त्वाप्र-
तिबोधेति त्रयाणामवान्तरविशेषे स्थिते पृष्टे तुरीये किमायातमित्याशंक्याह तत इति तयोस्तस्मिन्नविद्यमानत्वं विविदेकृतानेनयोर्नि-
रूपयितुमशक्यत्वादित्याह न संभवत इति ॥११॥ प्राज्ञस्य कारणबद्धत्वं साधयति नात्मानमिति तुरीयस्य कार्यकारणाभ्यामसंस्पृष्टत्वं

विश्वादीनां सामान्यविशेषभावो निरूप्यते तुर्ययाथात्म्यावधारणार्थं कार्यं क्रियत इति फलभावः कारणं करोतीति बीजभावः तत्त्वा-
ग्रहणान्यथाग्रहणाभ्यां बीजफलभावाभ्यां तौ यथोक्तौ विश्वतैजसौ बद्धौ संगृहीताविष्येते प्राज्ञस्तु बीजभावेनैव बद्धः तत्त्वाप्रतिबो-
धमात्रमेव हि बीजं प्राज्ञत्वे निमित्तं ततो द्वौ तौ बीजफलभावौ तत्त्वाग्रहणान्यथाग्रहणौ तुर्ये न सिध्यतो न विद्येते न संभवत इत्य-

कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः ॥११॥ नात्मानं न परांश्चैव न सत्यं नापि ॐ

र्थः ॥११॥ कथं पुनः कारणबद्धत्वं प्राज्ञस्य तुरीये वा तत्त्वाग्रहणान्यथाग्रहणल-॥ चानृतं प्राज्ञः किंचन संवेत्ति तुर्यं तत्सर्वदृक्‌स ॐ
क्षणौ बंधौ न सिध्यत इति यस्मादात्मविलक्षणमविद्याबीजप्रसूतं बाह्यं द्वैतं प्राज्ञो न किंचन सं वेत्ति यथा विश्वतैजसौ तत-
श्चासौ तत्त्वाग्रहणेन तमसा अन्यथाग्रहणबीजभूतेन बद्धो भवति यस्मात्तुरीयं तत्सर्वदृक्‌सदा तुरीयादन्यस्याभावात्सर्वदा स
देवेति सर्वं च तत् दृक् चेति सर्वदृक् तस्मान्न तत्त्वाग्रहणलक्षणं बीजं ॥ त

स्फुटयति तुर्यमिति श्लोकव्यावर्त्यामाशंकामाह कथमिति बाह्याद्वालक्षणमित्यस्यानुवृत्तिः सूच्यते प्रथमद्वितीयोत्तरत्वेन पादद्वयं व्याच-
ष्टे यस्मादिति विलक्षणमनात्मानमिति यावत् अनृतमित्यस्य व्याख्यानमविद्याबीजप्रसूतमिति द्वैतं हि तौयमसत्यमित्यर्थः वैध-
र्म्योदाहरणं यथेति प्राज्ञस्य विभागविज्ञानाभावे फलमाह ततश्चेति यथोक्तं तमसीति कार्यलिंगमनुमानं सूचयति अन्यथेति द्वि-
तीयं चोथं च तुर्यपादं व्याख्यानेन प्रत्याख्याति इति यस्मादित्यादिना संदेवं तुरीयादन्यस्याभावात्तुरीयमेव सर्वं तच्च सदा दृग्रूपमिति

आगम॰
२२

संख्याविशेषविषयत्वाभावे कथं चतुर्थत्वमित्याशंक्याह प्रतीयमानेति चतुर्थं तुरीयमित्यनयोर्व्याख्यानमाख्येयत्वेनार्थोन रुक्तं न त्वनेन तस्योक्तविशेष
णात्वे पि मनसि किमायातमित्याशंक्याह स आत्मेति आत्मनि यथोक्तविशेषणाभिन्न प्रतिभातीत्याशंक्याह स विज्ञेय इति तदेतद्व्याचष्टे
प्रतीयमानेति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादित्यादिवाक्यानि प्रतीकोपादानेन दर्शयति नहि द्रष्टुरिति आत्मन्येव
वहार्ये कुतो विज्ञेयत्वमित्याशंक्याह तद्रूपमविद्यावस्थायां ज्ञेयत्वात्त्यागतिस्तयेदानीमपि विज्ञेयत्वमुक्तमित्याह भूतेति विद्यावस्था
यामेव किमिति ज्ञातृज्ञानज्ञेयविभागो न भवतीत्याह ज्ञातृ इति ज्ञानेनेतरकारणस्याज्ञानस्यापनीतत्वादित्यर्थः अंतःप्रज्ञत्वादि
प्रस्तुतेर्थे तद्विवरणरूपान् श्लोकानवतारयति अत्रैते इति विविधं स्थानत्रयमस्यास्तीति विभुत्वमनात्तुरीयो विभुरुच्यते नहि तुरीय

प्रतीयमानं पादत्रयरूपं वैलक्षण्यात्तत्पातस आत्मा स विज्ञेय इति प्रतीयमानसर्पभूच्छिद्रदंडादिव्यतिरिक्ता यथा रज्जुस्तथा तत्त्व
मसीत्यादिवाक्यार्थ आत्मा अदृष्टो द्रष्टा नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इत्यादिभिरुक्तो यः स विज्ञेय इति भूतपूर्वगत्या ज्ञाते
द्वैताभावः प्राज्ञतैजसविश्वलक्षणानां सर्वदुःखानां निवृत्तेः ईशानस्तुरीय आत्मा ईशान इत्यस्य पदस्य व्याख्यानं प्रभुरिति दुः

स आत्मा स विज्ञेयः अत्रैते श्लोका भवंति निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः अद्वैतः सर्वभावानां देवस्तुर्यो विभुः

खनिवृत्तिं प्रति प्रभवतीत्यर्थः तद्धि ज्ञाननिमित्तत्वात्तद्दुःखनिवृत्तेः अव्ययः न व्येति स्वरूपान्न व्यभिचरतीति ॥ स्मृतः १०
यावदेतत्कुतः यस्मादद्वैतः सर्वभावानां रज्जुसर्पवन्मृषात्वात्स एष देवो द्योतनात्तुरीयश्चतुर्थः विभुर्व्यापी स्मृतः १०

तिरेकेण स्थानत्रयमात्मानं धारयति सर्वदुःखानामाध्यात्मिकादिभेदभिन्नानां तद्वैतवांतदाधारत्वमिति यावत् ईशानपदं प्रयुंजन् प्रभुप
दप्रयुंजानस्तयोर्नरुक्त्यमित्याशंक्याह ईशान इति तुरीयस्य दुःखनिवृत्तिं प्रति सामर्थ्यमीशनत्वात्तस्मिन् कदाचिदपि दुःखसादित्याशंक्या
ह तद्धि ज्ञानेनेति संसाररूपेण व्ययोस्तीत्याशंक्याविक्रियत्वरूपादिति तत्र प्रश्नपूर्वकमद्वितीयत्वे हेतुमाह एतत्कुत इति अतो द्वितो
यस्य व्येयहेतोरभावादिति दोषः विश्वादीनां दृश्यमानत्वात्तुरीयस्याद्वितीयत्वासिद्धिरित्याशंक्याह सर्वभावानामिति अवस्थात्रयातीत

स्यतुरीयस्योक्तलक्षणत्वं विद्वदनुभवसिद्धमिति सूचयति स्म
तइति १०

मां॰भा॰टी॰ २३ स्वप्नेति ननु तैजसस्यैव स्वप्नयुक्तत्वं युक्तं न तु विश्वस्य प्रबुद्ध्यमानस्य तद्योगो युज्यते प्रबुध्यमानत्वव्याघातात् न कथमविशेषेण विश्वतैजसौ
स्वप्ननिद्रायुतावितितत्राह स्वप्नशब्दार्थमाह स्वप्नइति यथा रज्ज्वां सर्पोऽग्रहणादन्यथाग्रहणं तेन तथा स्वात्मनि देहादिग्रहणमन्यथाग्र
हणं स्वात्मनो देहादिवैलक्षण्यापरिस्फूर्तियुक्तिसिद्धत्वात्तेन स्वप्नशब्दितेनान्यथाग्रहणेन संसृष्टत्वं विश्वतैजसयोरविशिष्टमित्यर्थः
ग तथापि निद्राशब्दं व्याचष्टे निद्रायुक्तानत्तु प्रबोधवतो विश्वस्य सा कथमित्याह निद्रेति उक्ताभ्यां स्वप्ननिद्राभ्यां विश्वतैजसयोर्वैशिष्ट्यं निगमय
ति ताभ्यामिति तयोरन्यथाग्रहणाग्रहणेन चैवैशिष्ट्यमुपेत्य प्राज्ञेऽपि स्वप्नचितमित्याह अतइति द्वितीयपादं विभजते प्राज्ञस्त्वि

स्वप्नेऽन्यथाग्रहणं सर्पइव रज्ज्वां निद्रा ज्ञातत्वाप्रतिबोधलक्षणं तमइति ताभ्यां स्वप्ननिद्राभ्यां युक्तौ विश्वतैजसौ अतस्तौ कार्यका
रणबद्धावित्युक्तौ प्राज्ञस्तु स्वप्नवर्जितकेवलयैव निद्रया युतइति कारणबद्ध इत्युक्तं नोभयं पश्यन्ति तुरीये निश्चिता ब्रह्मविदो
विरुद्धत्वात् सवितरीव तमः अतो न कार्यकारणबद्ध इत्युक्तस्तुरीयः १४ कदा तुरीये निश्चितो भवतीति उच्यते स्वप्ने

स्व स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः १४

जागरितयोरन्यथा रज्ज्वां सर्पइव गृह्णतः तत्त्वं स्वप्नो भवति निद्रा तत्त्वमजानतस्तिस्रष्ववस्थास्तु तुल्यास्वप्ननिद्रयोस्तुल्यत्वा
द्विश्वतैजसयोरेकराशित्वं ॥ ॥श्रीरामचन्द्राय नमः॥ ॥०॥ ॥०॥ ॥

ति द्वितीयार्द्धं व्याचष्टे नोभयमिति तुरीये निद्रास्वप्नयोरदर्शने हेतुमाह विरुद्धत्वादिति अज्ञानतत्कार्ययोर्नित्यविज्ञप्तिरूपे तुरी
ये विरुद्धत्वादनुपलब्धिरित्यत्र दृष्टान्तमाह सवितरीवेति तुरीये वस्तुतो नाशविद्यातत्कार्ययोः संगतिरस्तीति अंगीकृत्य प्राज्ञेऽपि स्वप्नचि राम॰
तमित्याह अतोनेति १४ कदा तर्हि स्वप्नो भवतीत्यपेक्षायामाह अन्यथेति निद्रा तर्हि कदेति संदिहानं प्रत्याह निद्रेति तुरीयं प्रति २३
पत्तिसमयं संगिरते विपर्यासइति श्लोकव्यावर्त्यमाशंकां दर्शयति कदेति कदा स्वप्ननिष्ठो भवति कदा वा निद्रानिष्ठः स्यादित्यपि द्रष्टव्यं

तत्रेति परिहरति चिदेकतानं तुरीयं परमार्थपते अन्तरेवेति कारणाभावे कार्यानुपपत्तेरित्यर्थः तुरीये तत्त्वाग्रहणान्यथाग्रहणयोरसंभवं दृष्टान्तेन साधयति नहीति यत्तु तुरीयस्य सदा दृगात्मत्वमुक्तं तत्र प्रमाणमाह नहिद्रष्टुरिति चतुर्थपादं प्रकारान्तरेण योजयति अथवेति तत्रापि श्रुतिमनुकूलयति नान्यदिति १२ अनुमानप्रयुक्तं तुरीयेपि कारणबद्धत्वाशंकां परिहरति श्लोकस्य तात्पर्यं गृह्णाति निमित्तान्तरेति विमतं कारणबद्धं द्वैताग्रहणात्वात् प्राज्ञवदित्यनुमानमेव दर्शयन् निमित्तान्तरमेव स्फोरयति कथमिति अनुमानकृता

द्वैतस्येति

न च तत्त्वस्य तस्यान्यथाग्रहणस्यापि अन्तरेणाभावो नहि सवितरि सदाप्रकाशात्मके तद्विरुद्धमप्रकाशनमन्यथाप्रकाशनं वा संभवति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति श्रुति अथवा जाग्रत्स्वप्नयोः सर्वभूतावस्थः सर्ववस्तुदृगाभासस्तुरीय एवेति सर्वदृक्सदा नान्यदतोस्ति द्रष्टृत्यादिश्रुतेः १२ निमित्तान्तरप्राप्तशंकानिवृत्त्यर्थोयं श्लोकः कथं द्वैताग्रहणस्य तुल्यत्वात्कार

द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते १२ ॥ ० ॥

णबद्धत्वं प्राज्ञस्यैव न तुरीयस्येति प्राप्ताशंका निवर्त्यते यस्माद्बीजनिद्रायुतस्तत्त्वाप्रतिबोधो निद्रा सैव च विशेषप्रतिबोधप्रसवस्य बीजं सा बीजनिद्रा तया युतः प्राज्ञः सदादृक्स्वभावत्वान्न तत्त्वाप्रतिबोधलक्षणा बीजनिद्रा तुरीये न विद्यते अतो न कारणबंधस्तस्मिन्नित्यभिप्रायः १३

शंकानिवर्तकत्वेन श्लोकमवतारयति प्राज्ञेति प्राज्ञस्योत्तरभाविप्रबोधादिकार्यापेक्षयानि ॥ पत्तएवं भावित्वं कारणबद्धत्वे प्रयोजकं न च तुरीयस्य तदस्तीत्यप्रयोजको हेतुरित्याह यस्मादिति किं च तुरीयस्य विमुद्धविद्यानुत्वं प्रसाधनप्रमाणबाधात् कालात्ययापदिष्टो हेतुरित्याह सदेति न च पूर्वोक्तोपाधेः साधनव्याप्तिः तुरीयस्योत्तरभाविकार्यापेक्षयापि यत्प्राप्त्याभिलाषाभावादिति मत्वाह तत्रेति दोषद्वयवत्त्वेनानुमानस्याभासत्वे फलितमाह अतोनेति १३ कार्यकारणबद्धौ ताविस्यादि

श्लोकोक्तमर्थमनुभवावष्टंभेन प्रपंचयति॥

24

कथं प्रतिबोधनं तत्राह नासीति अनुभूयमानतत्त्वमेवमित्युच्यते यदोक्तविशेषणेन गुरुणा प्रतिबुध्यमानः शिष्यः तदा स्वात्मैवेवं स्वमा
त्राप्रकारेण प्रतिबुद्धो भवतीत्युक्तं तमेव प्रकारं प्रश्नपूर्वकं द्वितीयार्द्धव्याख्यानेन विशदयति कथमित्यादिना अस्मिन्निति समस्त
बोध्यात्मस्वरूपपरामर्शः तेन वा संकार्यमान्तरं कारणं तत्त्वाभयमिह नास्ति ततो जन्मादिभावविकारस्य नावकाशः संभवतीत्यर्थः
अत्र तादृशविशेषणसमर्पणायोजयति सत्त्वमसीति अजत्वादेवानिद्रत्वादिभावे कारणस्य भ्रमाणाभावेन वक्तुमशक्यत्वादि
तिमत्त्वाह यस्मादिति अनिद्रत्वे हेतुत्वेनोक्त्वा विशेषणान्तरं दर्शयति अस्वप्नमिति अग्रहणान्यथाग्रहणसंबंधवैधुर्यं हेतुं हेतुमुक्त्वा।

नास्यैवं तत्त्वं हेतुफलात्मकं किंतु तत्त्वमसीति प्रतिबोध्यमानो यदा तदैवं प्रतिबुध्यते कथं नास्मिन्बाह्यमाभ्यन्तरं वा जन्मादि
भावविकारोऽस्ति अतोऽजं सबाह्याभ्यन्तरं सर्वभावविकारवर्जितमित्यर्थः यस्माज्जन्मादिकारणभूतं नास्मिन्नविद्यातमो
बीजं निद्रा विद्यत इति अनिद्रं हि तत्तुरीयं अत एव स्वप्नं तन्निमित्तत्वादन्यथाग्रहणस्य यस्माच्चानिद्रमस्वप्नं तस्मादजम

प्रपंचो यदि विद्येत [illegible] निवर्तेत न संशयः मायामात्रमिदं द्वैतमद्वैतं परमार्थतः १७

द्वैतं तुरीयमात्मानं बुध्यते तदा १६ प्रपंचनिवृत्त्या चेत्प्रतिबुध्यते अनिवृत्ते प्रपंचे कथमद्वैतमिति उच्यते सत्यमेवं स्या
त्प्रपंचो यदि विद्येत रज्ज्वां सर्प इव कल्पितत्वान्न तु स विद्यते विद्यमानश्चेन्निवर्तेत न संशयः ॥ ॥१७॥ ॥

विशेषणद्वयमित्याह यस्माच्चेति तत्त्वमेवं लक्षणमस्त्वात्मनः किं मायातमित्याशंक्याह तुरीयमिति तदा विशिष्टेनाचार्ये
ण विशिष्टशिष्यप्रतिबोधनावस्थायामित्यर्थः १६ तुरीयमद्वैतमित्युक्तं तदयुक्तं प्रपंचस्य द्वितीयस्य सत्त्वादित्याशंक्याह प्र
पंचइति प्रपंचनिवृत्त्यात्तुरीयप्रतिबोधात्तदद्वितीयत्वमविरुद्धमिति सिद्धांतिको माशंकां पूर्ववाद्यनुवदति प्रपंचेति नहि पूर्वं प्र
पंचनिवृत्तेरनिवृत्तस्य तस्य सत्त्वान्नाद्वैतं सेद्धुमर्हतीति पूर्ववादी ब्रवीति अनिवृत्त इति सिद्धांतिश्लोकेनोत्तरमाह उच्यत इ
ति किं प्रपंचस्य वस्तुत्वं उपेत्याद्वैतानुपपत्तिरुच्यते किं वाऽवस्तुत्वमिति विकल्प्याद्ये द्वैतानुपपत्तिमंगीकरोति सत्यमिति अद्वै
तं तर्हि कथमुपपद्येतेत्याशंक्य प्रपंचस्यावस्तुत्वपक्षे तदुपपत्तिरित्याह रज्ज्वामिति॥

एम०
२५

उत्पन्नइति तत्र कदा स्वप्नो भवतीति प्रश्नं परिहरति स्वप्नेति अवस्थाद्वये स्वप्नद्रष्टुरित्यर्थः द्वितीयं प्रश्नं समाधत्ते निद्रेति विश्वादिषु
त्रिषु तयोरिति द्विवचनं कथमित्याशंक्याह स्वप्ननिद्रयोरिति विश्वतैजसावेकोराशिः प्राज्ञो द्वितीयः ततः श्लोके द्विवचनमवि
रुद्धमित्यर्थः प्रथमे राशौ विपर्यासस्वरूपं कथयति अन्यथेति द्वितीये राशौ विपर्यासविशेषं दर्शयति तृतीयेत्विति द्वितीयाद्वि
गतान्यक्षराणि व्याकरोति अतइति द्विवचनस्य उपपन्नत्वात् विपर्यासस्य च विभागेन निर्द्धारितत्वादित्यर्थः तृतीयं प्रश्नं प्रति
विधत्ते तदेति तत्त्वप्रबोधाद्विपर्यासक्षयावस्थायामित्यर्थः १५ कदा तत्त्वप्रतिबोधो विपर्यासक्षये हेतुर्भवतीत्यपेक्षायामाह

अन्यथाग्रहणप्राधान्याद्गुणभूता निद्रेति तस्मिन्विपर्यासः स्वप्नः तृतीये तु स्थाने तत्त्वाज्ञानलक्षणा निद्रैव केवला वि
पर्यासः अतस्तयोः कार्यकारणस्थानयोरन्यथाग्रहणाग्रहणलक्षणविपर्यासे कार्यकारणबन्धरूपे परमार्थतत्त्व
प्रतिबोधतः क्षीणे तुरीयं पदमश्नुते तदोभयलक्षणं बन्धरूपं तत्रापश्यन् तुरीये निश्चितो भवतीत्यर्थः १५ योयं संसा

अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वमजानतः विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते १५ अनादिमायया सुप्तो य
रीजीवः स उभयलक्षणेन तत्त्वाप्रतिबोधरूपेण बीजात्मनान्यथाग्र ((दा जीवः प्रबुध्यते अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा १६
हणलक्षणेन चानादिकालप्रवृत्तेन मायालक्षणेन स्वप्नेन ममायं पिता पुत्रोयं नप्ता क्षेत्रं पशवो हमेषां स्वामी सुखी दुःखी क्ष
पितोहमनेन वर्द्धितश्चानेनेत्येवंप्रकारान्स्वप्नान्पश्यन्सुप्तो यदा वेदान्तार्थतत्त्वाभिज्ञेन परमकारुणिकेन गुरुणा

॥अनादीति प्रतिबुध्यमानं तत्त्वमेव विशिनष्टि अजमिति जीवशब्दवाच्यमर्थं निर्दिशति योयमिति परमात्मैव जीवभावमापन्नः
संसरतीत्यर्थः तस्य कथं जीवभावापत्तिरित्याशंक्य कार्यकारणबद्धत्वादित्याह सइति परमात्मोभयलक्षणेन स्वापेन सुप्तो जी
वो भवतीत्यन्वयः स्वापमेवोभयलक्षणमेव प्रकटयति तत्त्वेत्यादिना मायालक्षणेनेत्युभयत्र संबध्यते स्वमे च वचनं कि ममेमा

मां०भा०टी०
२५

श्लोकमावर्त्याशंकामाह नन्विति तदनिवृत्तौ नाद्वैतसिद्धिर्नच शास्त्रादिभेदस्य कल्पितत्वाद्विरोधस्तस्यासतो धूमाभा
सवत्तत्त्वज्ञानहेतुत्वानुपपत्तेरित्यर्थः धूमाभासस्याग्न्याभासस्यानुमापकत्ववत्तत्त्वेऽपि कल्पितस्य शास्त्रादेस्तत्त्वज्ञानहेतुत्वं प्रतिबिंबा
दिवदुपपन्नमित्युत्तरमाह उच्यतइति शिष्यः शास्ता शास्त्रमित्ययं विकल्पो विभागः सोऽपि निवृत्तिप्रतियोगित्वादवस्तु
त्वात्तत्त्वज्ञानबाध्यत्वादद्वैतानविरोधीत्यर्थः शिष्यादिविभागस्य कल्पितत्वं दृष्टान्तेन स्पष्टयति यथेति मायाविना प्रयुक्ता मा
न्तापथा कल्पिते ष्यते यथा च सर्पधारादिर्विकल्पितः तथायं प्रपंचः सर्वोऽपि कल्पितो वस्तु न भवतीति प्रपंचितं तथैव प्रपं

ननु शास्ता शास्त्रं शिष्य इति विकल्पः कथं निवर्तत इति उच्यते विकल्पो विनिवर्तेत यदि केनचित्कल्पितः स्यात् यथा
यं प्रपंचो मायारज्जुसर्पवत्तथायं शिष्यादिभेदविकल्पोऽपि प्राक्प्रतिबोधादुपदेशनिमित्तोऽत उपदेशादयं वा
दः शिष्यः शास्ता शास्त्रमिति उपदेशकार्ये तु ज्ञाने निर्वृत्ते ज्ञाते परमार्थतत्त्वे द्वैतं न विद्यते १८ अभिधेयप्रधान ओंका

सोऽयमात्माध्यक्षरमोंकारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति॥

र इत्युक्तं वाद्यात्मेति व्याख्यातो यः सोऽयमात्माध्यक्षरं अक्षरमधिकृत्याभिधानप्राधान्येन वर्ण्यमानोऽध्यक्षरं किं पुनस्त
दक्षरमित्याह ओंकारः सोऽयमोंकारः पादशः प्रविभज्यमानोऽधिमात्रं मात्रामधिकृत्य वर्तत इत्यधिमात्रः कथं आ
त्मनो ये पादास्ते ओंकारस्य मात्राः कास्ताः अकार उकारो मकार इति॥ ॥ ॥ ॥

चैकदेशः शिष्यादिरपि ज्ञानात्प्राक्कल्पितः सन् अज्ञानकृतो मिथ्येत्यर्थः किमिति ज्ञानात्पूर्वमसौ कल्प्यते तत्राह उ
पदेशादिति उपदेशमुद्दिश्य प्रयोक्तृविभागवचनमित्युक्तमुपसंहरति अत इति उपदेशात्प्रागिव तस्मादूर्ध्वमपि भेदेनैवै
तेतमित्याशंक्य विशेषितं सप्रशमान्नैवमित्याह उपदेशेति १८ तत्त्वज्ञानसमर्थानामधमानामुत्तमानां वाधिकारिणाम
ध्यारोपापवादाभ्यां परमार्थीकृततत्त्वमुपदिष्टमिदानीं तत्त्वग्रहणासमर्थानां मध्यमाधिकारिणां माध्यानविधानायारोपदृ
ष्टिमेवावष्टभ्याचष्टे अभिधेयप्राधान्येना॥ अध्यक्षरमित्येतद्व्याकरोति अक्षरमिति अध्यक्षरमित्यत्र किं पुनस्तदक्षरमि

रा०
२५

यथा सर्पो रज्ज्वां कल्पितो वस्तुतो नास्ति तथा प्रपंचोपि कल्पितत्वान्नैव वस्तुतो विद्यते तथा च तात्त्विकमद्वैतमविरुद्धमित्यर्थः उक्तमर्थं व्यतिरेकमुखेन साधयति विद्यमानश्चेदिति यद्यात्मनिकारणाधीनः सन् प्रपंचो विद्येत तदा कृतकस्यानित्यत्वनियमात्तन्निवृत्तिरवश्यंभाविनी कार्यस्य च निवृत्तिर्नाम कारणसंसर्गस्ततः सति कारणे प्रपंचनिवृत्तेरनात्यंतिकत्वादद्वैतानुपपत्तिराशंकेत न च कारणाधीनः सन् प्रपंचोस्ति तस्य कल्पितत्वेनावस्तुत्वादित्यर्थः प्रपंचस्य मायया विद्यमानत्वेन न वस्तुत्वमित्युदाहरणाभ्यामुपपादयति नहीत्यादिना सर्पो हि रज्ज्वां भ्रांत्या कल्पितो नायं सर्पो रज्जुरेषेति विवेकधिया निवृत्तो नैव वस्तुना विद्यते बाधितस्य कालत्रयेपि सत्त्वाभावात् माया च इंद्रजालवत् द्वाभ्यां मायाविना प्रदर्शिता पार्श्वस्थानां मायादर्शनवतां च ९

नहि रज्ज्वां भ्रांतिबुध्या कल्पितः सर्पो विद्यमानः सन् विवेकतो निवृत्तो नैव माया मायाविना प्रयुक्ता तद्दर्शिनां च

विकल्पो विनिवर्तेत कल्पितो यदि केनचित् उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते १८ ॥

एवं द्वयोपगमे विद्यमाना सती निवृत्ता तथेदं प्रपंचाख्यं मायामात्रं द्वैतं रज्जुवन्मायाविवच्चाद्वैतं परमार्थतः तस्मागतस्य यथार्थदर्शनप्रतिबंधकस्यापगमे सति समुत्पन्नस्य १ ननु कश्चित् प्रपंचः प्रवृत्तो निवृत्तो वास्तीत्यभिप्रायः १८

म्यग्दर्शनतो निवृत्ता सती नैव वस्तुतो विद्यमाना भवितुमर्हतीत्येतदुदाहरणद्वयेन तथेदं द्वैतं प्रपंचाख्यं मायामात्रं न परमार्थतोस्तीत्यर्थः प्रपंचस्यासत्त्वे मूलवादः स्मारित इत्याशंक्याह रज्ज्वादेरिति प्रपंचस्य कालत्रयेपि सत्त्वाभावे तात्त्विकमद्वैतमविरुद्धमित्युपसंहरति तस्मादिति १७ प्रकारांतरेणाद्वैतानुपपत्तिमाशंक्य परिहरति विकल्प इति यदि केनचित् गुरुत्वेन शास्त्रं शिष्यादि विकल्पो हेतुतया विकल्पितस्तथापि स बाधितो निवर्तेत ननु तात्त्विकमद्वैतं विरोद्धमर्हति तत्त्वज्ञानात्प्रागवस्थायामेव तल्लोपदेशनिमित्तीकृत्य यतः शास्त्रादिभेदो न घटते उपदे

द्वितीयपादस्य द्वितीयमात्रायाश्चैकत्वं प्रतिपादयति स्वप्नेत्यादिना यथा प्रथमपादस्य प्रथममात्रायाश्चैकत्वं सामान्यं पुरस्तादुक्तं तथा
द्वितीयपादस्य द्वितीयमात्रायाश्चैकत्वे सत्येव सामान्ये वक्तव्ये तदभावे तदारोपायोगादिति द्रष्टव्यं केनेति सामान्योपन्यासपूर्वकमेक
त्वारोपं साधयति आहेति अकारस्य सर्ववाग्व्यापकत्वेनोत्कृष्टत्वस्य स्पष्टत्वात्कथं तस्मादुकारस्योत्कर्षो वर्ण्यते तत्राह अकार
दिति अकारस्योत्कर्षे वाच्येऽपि पाठक्रमादुकारस्योत्कर्षश्च त्वमौपचारिकं द्रष्टव्यं कारस्यामुमर्थमुपोद्बलयति यथा अकारादुकारो त
त्कर्षोद्दर्शितः तथा विश्वात्तैजसस्योत्कर्षो वक्तव्यः सूक्ष्माभिमानिनः स्थूलाभिमानिनः सकाशात् उत्कर्षस्य युक्तत्वादित्याह त

स्वप्नस्थानस्तैजसो योऽस्य सओंकारस्योकारो द्वितीया मात्रा केन सामान्येनेति आह उत्कर्षात् अकारादुत्कृष्ट इव ह्युकारः तथा
तैजसो विश्वात् उभयत्वाद्वा अकारमकारयोर्मध्यस्थ उकारः तथा विश्वप्राज्ञयोर्मध्ये तैजसः अत उभयभाक्त्वसामान्यात् वि

स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसंततिं समानश्च भवति नास्याब्रह्मवि

द्वत्फलमुच्यते उत्कर्षतीह वै ज्ञानसंततिं विज्ञानसंततिं वर्द्धयतीत्यर्थः समानस्तुल्यश्चामित्रपक्ष।। कुले भवति य एवं वेद
स्येव शत्रुपक्षाणामपि अप्रद्वेष्यो भवति अब्रह्मविदस्य कुले न भवति य एवं वेद॥ २ ॥ २ ॥ ७ ॥

वेति उकारतैजसयोर्न प्रत्येकमुभयत्वमेकत्वस्योभयत्वव्याघातादित्याशंक्य व्याकरोति अकारेति मध्यस्थत्वादुकारतैजसयोरुभय
भाक्त्वं सामान्यं तस्मात्तयोरेकत्वं शक्यमारोपयितुमित्याह अतइति यथोक्तैकत्वविज्ञानं फलवत्त्वादुपादेयमिति सूचयति विद्व गाम॰
दिति ज्ञानसंततेरुत्कर्षो नाम कुतश्चित्तस्याः भेदावेदनं तस्येष्टत्वाभावे कथं फलत्वमित्याशंक्याचष्टे विज्ञानेति पक्षद्वयतुल्य २६
त्वमेव प्रकटयति अप्रद्वेष्य इति सादृश्यभेदेन फलभेदमावेद्य द्विविधसादृश्यप्रयुक्तैकत्वविज्ञानफलमाह अब्रह्मविदिति॥ ॥

26

आत्मा हि पादशो विभज्यते मात्रामधिकृत्य पुनरोंकारोऽवतिष्ठते तेन कथं पादशो विभज्यमानस्याधिमात्रत्वमिति पृच्छति कथमिति पा-
दानां मात्राणां चैकत्वादेतदविरुद्धमित्याह आत्मन इति पादानां मात्राणां च मध्ये विश्वाख्यविशेषस्याकारविशेषत्वं निगमयति तेषे
विश्वाकारयोरेकत्वं सादृश्ये सत्यारोपयितुं शक्यमन्यत्र सत्येव तस्मिन्नारोपसंदर्शनात्तथाच किं तदारोपप्रयोजकं सादृश्यमिति पृच्छति
केनेति सामान्योपन्यासपरां श्रुतिमवतारयति आहेति आप्तिमेवाकारस्य श्रुत्युपन्यासेन व्यनक्ति अकारेणेति अथात्माधिदैवक

तत्र विशेषनियमः क्रियते जागरितस्थानो वैश्वानरो यः स ओंकारस्याकारः प्रथमा मात्रा केन सामान्येनेति आह आप्तेः आप्तिर्व्या-
प्तिः अकारेण सर्वा वाग्व्याप्ता अकारो वै सर्वा वागिति श्रुतेः तथा वैश्वानरेण जगत् तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सु-
तेजा इत्यादिश्रुतेः अभिधानाभिधेययोरेकत्वं चावोचाम आदिरस्य विद्यत इत्यादिमत् यथैवादिमदकाराख्यमक्षरं तथैव वैश्वा-

मा९ जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राऽऽप्तेरादिमत्त्वाद्वाप्नोति ह वै सर्वान्कामानादिश्च भवति य एवं वेद॥ ९॥

नरः तस्माद्वा सामान्यादकारत्वं वैश्वानरस्य तदेकत्वविदः फलमाह आप्नोति ह वै सर्वान्कामानादिः प्रथमश्च भवति मह-
तां य एवं वेद यथोक्तमेकत्वं वेदेत्यर्थः॥ ॥श्रीकृष्णायनमः॥ ॥

योरेकत्वं पूर्वमुक्तमुपेत्य विश्वस्य वैश्वानरस्य जगद्व्याप्तिं श्रुत्यवष्टंभेन स्पष्टयति तथेति किंच सामान्यद्वारा वाच्यवाचकयोरेकत्वमा-
रोप्यं न भवति तयोरेकत्वस्य प्रागेवोक्तत्वादित्याह॥ अभिधानेति सामान्यान्तरमाह आदिरिति तदेव स्फुटयति यथैवेति उकारेम-
कारश्चेत्युभयमपेक्ष्य प्रथमपाठादादिमत्त्वमकारस्य द्रष्टव्यं विश्वस्य पुनरादिमत्त्वं तैजसप्राज्ञापेक्षयाद्यस्थाने वर्तमानत्वादित्यर्थः
उक्तस्य सामान्यान्तरस्य फलं दर्शयति तस्मादिति किमर्थमित्थं सामान्यद्वारा तयोरेकत्वमुच्यते तद्विज्ञानस्य फलवत्त्वादित्याह तदेक

त्यर्थविवरणात्तत्पाम्पूर्ववदेवश्लोकानवतारयति अत्रेति प्रथमपादस्य प्रथममात्रायाश्चाभेदांशे पार्थमुक्तं सामान्यद्वयं विशदयति विश्व
स्येति उत्क्म्याप्तेनादिरस्येत्यादाविति शेषः पुनरुक्तिपरिहारद्वारा विवक्षितमर्थमाह अत्वेति अनुवृत्तिद्योतकं दर्शयति चशब्दादिति
१९ द्वितीयपादस्य द्वितीयमात्रायाश्चैकत्वांशे प्रयोजकद्वयमुक्तं व्यनक्ति तैजसस्येति स्फुटमिति क्रियाविशेषणं तथाविधमित्य
स्यार्थं स्फुटमित्याह स्फुटमेवेति उत्वविज्ञान इत्यस्य व्याख्यानं मात्रासंप्रतिपत्ताविति तस्य व्याख्यानं सर्वमित्युच्यते तत्र पूर्ववद्दृष्टव्यमि

विश्वस्यात्वमकारमात्रत्वं यदा विवक्षते तदा आदित्वसामान्यमुक्तन्यायेनोत्कटमुद्भूतं दृश्यत इत्यर्थः आप्तविवक्षायामित्यस्य व्या
ख्यानं मात्रासंप्रतिपत्ताविति विश्वस्याकारमात्रत्वं यदा संप्रतिपद्यत इत्यर्थः आप्तिसामान्यमेव चोत्कटमित्यनुवर्तते चशब्दा

विश्वस्यात्वविवक्षायामादिसामान्यमुत्कटं मात्रासंप्रतिपत्तौ स्यादाप्तिसामान्यमेव च १९ तैजसस्योत्वविज्ञाने उत्क
र्षो दृश्यते स्फुटं मात्रासंप्रतिपत्तौ स्यादुभयत्वं तथाविधं २० मकारभावे प्राज्ञस्य मानसामान्यमुत्कटं मात्रास
प्रतिपत्तौ तु लयसामान्यमेव च २१ त्रिषु धामसु यत्तुल्यं सामान्यं वेत्ति निश्चितः स पूज्यः सर्वभूतानां वन्द्यश्चैव म

त १९ तैजसस्योत्वविज्ञाने उकारत्वविवक्षायामुत्कर्षो दृश्यते स्फुटं स्पष्टमित्यर्थः उभयत्वं च स्फुटमेवेति शेषः ॥ हामुनिः २२
र्ववत्सर्वं २० मकारत्वे प्राज्ञस्य मितिलयावुत्कृष्टसामान्य इत्यर्थः २१ यथोक्तस्थानत्रये तुल्यमुक्तं सामान्यं वेत्त्येवमेवैतदिति
त्युच्यते पूर्ववदिति १९ तृतीयपादस्य तृतीयमात्रायाश्चैकत्वाध्यासे सामान्यद्वयं प्र ॥ निश्चितो यः स पूज्यो वन्द्यश्च ब्रह्मविल्लोके च
सादर्शितं विशदयति मकारे अक्षरार्थस्य पूर्ववदेव सहज्ञानत्वाज्ज्ञान्यपर्यायमाह मकारत्व इति २१ विश्वादीनामकारादीनां च यत्तु राम०
ल्यसामान्यमुक्तं तद्विज्ञानं स्तौति त्रिष्विति यथोक्तस्थानत्रयं जागरितं स्वप्नः सुषुप्तं चेति त्रितयं तुल्यं पादानां मात्राणां चेति शेषः उ २७
क्तसामान्यमाप्तिरुत्कर्षो मितिरित्यादि महामुनिरित्यस्यार्थमाह ब्रह्मविदिति ॥२२॥ श्रीरामचंद्राय नमः ॥ ७ ॥ ७ ॥

27

तृतीयपादस्य तृतीयमात्रया चैकत्वमुपन्यस्यति सुषुप्तेति पूर्ववदेकत्वप्रयोजकमत्रापि प्रश्नपूर्वकमुपवर्णयति केनेत्यादिना मानमेवं वि
वृणोति मीयेतइति ॐमिति सोंकारस्यानैरंतर्येणोच्चारणे तोसत्यकारोकारौ प्रथमं मकारे प्रविश्य पुनस्तस्मान्निर्गच्छंताविवोपलभ्येते तेन मकारे
पि मानसामान्यमिति विवक्ष्यमित्यर्थः एकीभावमेव स्फोरयति ॐकारेति मकारवत्प्राज्ञेपि तद्विति सामान्यमित्याह तथेति उक्तस्यापि
सामान्यस्य फलमाह अनोचेति सामान्यदर्पद्वारेण प्राज्ञमकारयोरेकत्वज्ञानेनाविवक्षितं फलवत्वादित्याह मिनोतीति अविदुषोपि

सुषुप्तस्थानः प्राज्ञो यः स ॐकारस्य मकारस्तृतीया मात्रा केन सामान्येनेत्याह सामान्यमिदमत्र मितेर्मितिर्मानं मीयेते इव हि वि
श्वतैजसौ प्राज्ञेन प्रलयोत्पत्त्योः प्रवेशनिर्गमाभ्यां प्रस्थेनेव यवास्तथा ॐकारसमाप्तौ पुनः प्रयोगे च प्रविश्य निर्गच्छत इवाकारो
कारौ मकारे अपीतेर्वा अपीतिरप्यय एकीभावः ॐकारोच्चारणेन्त्येक्षरे एकीभूताविवाकारोकारौ तथा विश्वतैजसौ सुषु

सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदꣳ सर्वमपीतिश्च भवति य एवं वेद अ

प्तकाले प्राज्ञे अतो वा सामान्यादेकत्वं प्राज्ञमकारयोः विद्वत्फलमाह मिनोति ह वा इदं सर्वं जग ॥ अत्रैते श्लोका भवंति ॥ ॥
द्याथात्म्यं जानातीत्यर्थः अपीतिश्च जगत्कारणात्मा भवतीत्यर्थः अवांतरफलवचनं प्रधानसाधनस्तुत्यर्थं ॥ ११ ॥

जगद्विषयज्ञानमस्तीत्याशंक्य विशिनष्टि जगद्याथात्म्यमिति तद्याथात्म्यं चाव्याकृततत्वं प्रलयभवनमानेष्टत्वान्न फलमित्याशंक्या
ह जगदिति तत्र तत्रैकत्वज्ञाने फलभेदकथनादुपासनाभेदमाशंक्य अंगेषु फलभेदश्रुतेरर्थवादत्वमुपेत्याह अत्रेति पादानां
मात्राणां च क्रमादेकत्वविज्ञाने फलकथनं सर्वान् पादान् मात्राश्च सर्वाः सात्मन्यंतर्भाव्य प्रधानस्य ब्रह्मध्यानस्य साधनं पदं ॐकारा
ख्यमक्षरं तस्य स्तुत्या उपयुज्यते तेन च तदैकमुपासनमितरस्य तदंगत्वान्नोपास्तिभेदकत्वमित्यर्थः पादानां मात्राणां च यदेकत्वं

अमात्र इत्यादिना केवलत्वमद्वितीयत्वं विशेषणांतरमुपपादयति अभिधानेति अभिधानं वागभिधेयं मनस्तज्ज्ञानातिरिक्तार्था
भावस्याभिधास्यमानत्वात्तयोर्मूलाज्ञानक्षयेण क्षीणत्वादिति हेत्वर्थः अव्यवहार्येऽप्यात्मनास्त्येवेत्याशंक्य विकारजातवि
नाशावधित्वेनात्मनोऽवशेषान्नैवमित्याह प्रपंचेति तस्य च सर्वानर्थाभावोपलक्षितस्य परमानंदत्वेन पर्यवसानं सूचयति
शिव इति तस्यैव सर्वद्वैतकल्पनाधिष्ठानत्वेनावस्थानमभिप्रेत्याह अद्वैत इति ओंकारः तुरीयः सन्नात्मैवेति पदद्वयं तदुपसंहर
ति एवमिति यथोक्तविज्ञानं पदानां मात्राणां चैकत्वेन च पादा मात्राश्च तुरीयात्मन्योंकारे सति पूर्वं पूर्वं विभागश्चोत्तरोत्तरेण भा

अमात्रो मात्रा यस्य न सन्ति सोऽमात्र ओंकारश्चतुर्थस्तुरीय आत्मैव केवलः अभिधानाभिधेयरूपयोर्वाङ्मनसयोः क्षी
णत्वादव्यवहार्यः प्रपंचोपशमः शिवोऽद्वैतः संवृत्तः एवं यथोक्तविज्ञानवता प्रयुक्त ओंकारस्त्रिमात्रस्त्रिपाद आत्मैव सं

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपंचोपशमः शिवोऽद्वैत एवमोंकार आत्मैव संविशत्यात्मनात्मानं य एवं वेद य एवं वेद

विशत्यात्मना स्वेनैव स्वं पारमार्थिकमात्मानं य एवं वेद परमार्थदर्शिनां ब्रह्मविदां तृतीयं बीज ॥ ओंकामवेति॥—॥
भावं दग्ध्वात्मानं प्रविष्ट इति न पुनर्जायते तुरीयस्याबीजत्वात् नहि रज्जुसर्पयोर्विवेके रज्ज्वां प्रविष्टः सर्पः बुद्धिसंस्का
वेन क्रमादात्मनि पूर्ववत्स्थितौ केवलस्वरूपेणांतरं तत्प्रयुक्तः सन्नोंकारो मात्राः पा॥ रात्पुनः पूर्ववत्तद्विवेकिनामुत्थास्यति॥ ॥
दाश्च तस्मिन्नंतर्भाव्य अवस्थितस्यात्मनो भेदमसहमानस्तद्रूपो भवतीत्यर्थः उक्तं कथं तानस्य फलमाह संविशतीति सुषु
प्तेन ब्रह्मप्राप्तस्य पुनरुत्थानवन्मुक्तस्यापि पुनर्जन्म स्यादित्याशंक्याह परमार्थेति सुषुप्तस्य पुनरुत्थाने बीजभूतमज्ञानम
स्तित्वादुपपद्यते इह तु बीजभूतमज्ञानं तत्तृतीयं सुषुप्ताख्यं दग्ध्वैव ते आत्मानं तुरीयं प्रविष्टो विद्वानिति नासौ पुनरुत्थानमर्ह
ति कारणाभावे तत्कारणात्तद्योगादित्यर्थः तुरीयमेव पुनरुत्थानबीजं भविष्यतीत्याशंक्य कार्यकारणविनिर्मुक्तस्य तस्य तद
योगान्नैवमित्याह तुरीयस्येति मुक्तस्यापि पूर्वसंस्कारात्पुनरुत्थानमाशंक्य दृष्टांतेन निराचष्टे नहीति॥ ॥

पूर्वोक्तसामान्यज्ञानवतोऽध्याननिष्ठस्य फलविभागं दर्शयति अकार इति यत्र तु पादानां मात्राणां च विभागो नास्ति तस्मिन्नों-
कारे तुरीयात्मनि व्यवस्थितस्य प्राप्तप्राप्तव्यप्राप्तिविभागो नास्तीत्याह नामात्र इति ओंकारध्यायिनमकारो विश्वं प्रापय-
तीत्युक्तमयुक्तं विश्वप्राप्तेर्ध्यानमन्तरेणासिद्धत्वादकारस्य चाध्येयस्योक्तफलप्रापकत्वायोगादित्याशंक्याह अकारेति त-
दावलंबनेन तन्मात्रध्यानमिति यावत् अकारप्रधानमोंकारं ध्यायतो यथा वैश्वानरप्राप्तिस्तथोकारप्रधानं तमेव ध्यायतस्तै-
जसस्य हिरण्यगर्भप्राप्तिर्भवतीत्याह तथेति यस्तु मकारप्रधानमोंकारं ध्यायति तस्य प्राज्ञाख्याकृतप्राप्तिर्युक्तेत्याह म-
कारश्चेति किमपरात्पुरुषमिति मम पक्षे विवक्षिता चतुर्थपादं ध्यायतश्चाह क्षीणेतीति स्थूलप्रपंचो जागरितं विश्वश्चेत्येतत्त्रितयम-

पूर्वोक्तैः सामान्यैरात्मपादानां मात्राभिः सहैकत्वं कृत्वा यथोक्तोंकारं प्रतिपद्य यो ध्यायीत तं अकारो नयते वि-
श्वं प्रापयति अकारालंबनोंकारं विद्वान्वैश्वानरो भवतीत्यर्थः तथोकारस्तैजसं मकारश्चापि पुनः प्राज्ञं च प्राध्यान

अकारो नयते विश्वमुकारश्चापि तैजसं मकारश्च पुनः प्राज्ञं नामात्रे विद्यते गतिः ॥ ॥

नयत इत्यनुवर्तते क्षीणे तु मकारे बीजभावक्षयादमात्रे ओंकारे गतिर्न विद्यते क्वचिदित्यर्थः ॥ २३ ॥ ० ॥ ० ॥

कारमात्रं सूक्ष्मप्रपंचः स्वप्नः तैजसश्चेत्येतत्त्रितयमुकारमात्रं प्रपंचद्वयकारणं सुषुप्तं प्राज्ञश्चेत्येतत्त्रितयं मकारमात्रं तत्रापि
पूर्वमुत्तरोत्तरभावमापद्यते नैवं सर्वमोंकारमात्रमिति ध्यानात्स्थितस्य पदेतावन्तं कालमोमिति ह्येवाप्रतिपन्नं तत्स्वरूपमु-
द्ब्रह्मैवेत्याचार्योपदेशमनुसृत्य सम्यक्ज्ञानेन प्रत्यक्षसर्वविभागनिमित्ताज्ञानस्य मकारलीनगृहीतस्य स्वरूपे ब्रह्मण्येव शुद्धे
पर्यवसितस्य न क्वचिदपि गतिरुपपद्यते परिच्छेदाभावादित्यर्थः प्रत्यक्चैतन्यमोंकारसंवेदनेन त्रिमात्रेणोंकारेणाध्यस्तेन ता-
दात्म्यादोंकारो लिलक्ष्यते तस्य परं ब्रह्मैवार्थो काममात्रादिमुक्ता इति लक्ष्यते नाम वृत्तार्थं व्याकरोतीति ॥ ॥

इदानीं तदनभिज्ञस्य परोपदेशमात्रशरणस्य ध्यानकर्तव्यतां कथयति ननु मनसः समाधानं ब्रह्मणि कर्तव्यं किमिति प्रण
वे तत्कर्तव्यतोच्यते तत्राह प्रणव इति संप्रति प्रणवे समाहितचित्तस्य फलं दर्शयति प्रणवे नित्येति समाधानविषयमाह
यद्येति तुरीयरूपं यथोच्यते तत्र हेतुमाह यस्मादिति तदेव साधयति नहीति तत्रैवैतिरीयकश्रुत्यानुकूल्यमाह विद्वानि

युंजीत समादध्यात् यथाव्याख्याते परमार्थरूपे प्रणवे चेतो मनः यस्मात् प्रणवो ब्रह्म निर्भयं न हि तत्र सदा युक्तस्य भ
यं विद्यते क्वचित् विद्वान्न बिभेति कुतश्चनेति श्रुतेः २५ परापरे ब्रह्मणी प्रणवः परमार्थतः क्षीणेषु मात्राप

युंजीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयं प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् २५ प्रणवो ह्यप
रं ब्रह्म प्रणवश्च परः स्मृतः अपूर्वोनंतरोबाह्योनपरः प्रणवोव्ययः २६

देषु परात्मा ब्रह्मेति न पूर्वं कारणमस्य विद्यत इत्यपूर्वः नास्यांतरं भिन्नजातीयं किंचिद्विद्यत इत्यनंतरः तथा बाह्य
मन्यन्न विद्यत इत्यबाह्यः अपरं कार्यमस्य न विद्यत इत्यनपरः सबाह्याभ्यंतरो ह्यजः सैंधवघनवदित्यर्थः २६ ॥

ति २५ कीदृशस्तर्हि प्रणवो मंदानां मध्यमानां चाधिकारिणां ध्येयो भवतीत्याशंक्याह प्रणवो हीति उत्तमाधिकारिणां
कीदृशस्तर्हि प्रणवः सम्यक्ज्ञानगोचरो भवति तत्राह अपूर्व इति परापरब्रह्मात्मना प्रणवो मंदमध्यमाधिकारिणां ध्ये राम०
यतामुपगच्छतीति पूर्वार्द्धं व्याचष्टे परेति उत्तमाधिकारिणां तु सर्वविशेषशून्यमेकरसं प्रत्यक्भूतं पूर्णं ब्रह्म तद्रूपेण प्रणवः २९
सम्यक्ज्ञानाधिगम्यो भवतीत्युत्तरार्द्धं विभजते परमार्थत इत्यादिना उक्तेर्थे प्रमाणं सूचयति सबाह्येति २६ ॥

स्पोन्नस्यामति= एवंविदित्यविवेकावस्थायामिवेत्यर्थः नहि विवेकिनो रज्जुसर्पविवेकविज्ञानवतामितिपावत् बुद्धिसंस्कारादीनां तत्र बुद्धिमात्रेण सर्पभ्रां
निर्गस्तनेउत्तमाधिकारिणामोंकारद्वारेणपरिशुद्धब्रह्मात्मैकाविदामपुनरावृत्तिलक्षणामुक्तंफलमिदानीमंदानांमध्यमानांचैक
थे ब्रह्मप्रतिपत्त्या फलप्राप्तिरित्याशंक्याह मंदेति तेषामपि क्रममुक्तिरविरुद्धेत्यर्थः नन्वेवं वाक्यशेषानुकूल्यं कथयति तथाचे
ति यथा एवमाचार्यैराश्रुत्यर्थप्रकाशकाः श्लोकाः प्रणीतास्तथोत्तरेपि श्लोकाः श्रुत्युक्तार्थ एव संभवंतीत्याह एवंविदिति ॐका

मंदमध्यमधियांतु प्रतिपन्नसाधकभावानां सन्मार्गगामिनां संन्यासिनां मात्राणां पादानां च क्लृप्तसामान्यविदां यथावदु
पास्यमान ॐकारो ब्रह्मप्रतिपत्तये आलंबनीभवति तथाच वक्ष्यति आश्रमास्त्रिविधा हीनेत्यादि एवंवदत्रैते श्लोका भवं

ॐकारं पादशो विद्यात्पादा मात्रा न संशयः ॐकारं पादशो ज्ञात्वा न किंचिदपि चिंतयेत् २४ ॥ ॥

ति यथोक्तैः सामान्यैः पादा एव मात्रा मात्राश्च पादाः तस्मात् ॐकारं पादशो विद्यादित्यर्थः एवमोंकारे ज्ञाते दृष्टार्थमदृ
ष्टार्थं वा न किंचित्प्रयोजनं चिंतयेत् कृतार्थत्वादित्यर्थः ॥ २४ ॥ ० ॥ ० ॥ ० ॥

रस्य पादशो विद्या कीदृशीत्याशंक्याह पादा इति पादानां मात्राणां चान्योन्यमेकत्वं कृत्वा तद्विभागविधुरमोंकारं ब्रह्मबुद्ध्या
ध्यायतो भवति कृतार्थतेति निर्दर्शयति ॐकारमिति तस्मात्पादानां मात्राणां चान्योन्यमेकत्वादित्यर्थः तदेकत्वपुरस्कृत्य ॐ
कारमुभयविभागशून्यं ब्रह्मबुद्ध्या जानीयादित्याह ॐकारमिति उत्तरार्द्धस्य तात्पर्यमाह एवमिति २४ प्रणवानुसंधान
कुशलस्य प्रणवज्ञानेनैव सर्वदृष्टापवादकेन कृतार्थता भवतीत्युक्तं ॥ ० ॥ ० ॥ ० ॥

मां·भा·टी· स्तवयति तत्स्मरणादेवेति तदात्मभावमित्यत्र तच्छब्देनाएवंविदितविशेषणं परमार्थवस्तु परामृश्यते २७ ब्रह्मबुभुत्सु
३० णावमभिध्यायतो हृदयाख्यदेशमुपदिशति प्रणवमिति परमात्मदर्शिनस्तद्देशाधनवच्छिन्नवस्तुदर्शनाच्छो
कमोहाभावे तत्र को मोहः कः शोक इत्यादिश्रुतिसिद्धमनुवदति सर्वव्यापिनमिति हृदये देशे प्रणवभूतस्य ब्रह्मणो
ऽवच्छेदं निरस्यति स्मृतिप्रत्ययेति बुद्धिमानिति विवेकित्वमुच्यते मत्वेति साक्षात्कारसंपत्तिर्विवक्ष्यते विवे

सर्वप्राणिजातस्य स्मृतिप्रत्ययास्पदे हृदये स्थितमीश्वरं प्रणवं विद्यात् सर्वव्यापिनं व्योमवदोंकारमा
त्मानमसंसारिणं धीरो बुद्धिमान् मत्वा न शोचति शोकनिमित्तानुपपत्तेः तरति शोकमात्मविदित्यादि

प्रणवं हीश्वरं विद्यात्सर्वस्य हृदि संस्थितं सर्वव्यापिनमोंकारं मत्वा धीरो न शोचति ॥२८॥ अ
मात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः ओंकारो विदितो येन स मुनिर्नेतरो जनः ॥२९॥ ॥

श्रुतिभ्यः २८ अमात्रस्तुरीय ओंकारो मीयतेऽनयेति मात्रा परिच्छित्तिः साऽनन्ता यस्य सोऽनन्तमात्रः॥ ॥

कद्वारा तत्त्वसाक्षात्कारे सति शोकनिवृत्तौ हेतुमाह शोकेति तस्य हि निमित्तमात्माज्ञानं तस्यात्मसाक्षात्कारतो नि आग०
वृत्तौ शोकानुपपत्तिरित्यत्र प्रमाणमाह तरतीति आदिशब्देन भिद्यते हृदयग्रन्थिरित्यादिश्रुतिर्गृह्यते २८ ओं ३०
कारं तुरीयभावमापन्नं यः प्रतिपन्नस्तं स्तौति अमात्र इति यथोक्तप्रणवप्रतिपत्तिविहीनस्तु जननमरणमात्रभा
गीन पुरुषार्थभाक्॥

30

यदोंकारस्य प्रत्यगात्मत्वमापन्नस्य तुरीयस्यापूर्वत्वमनंतरत्वमित्यादिविशेषणमुक्तं तत्र हेतुमाह सर्वस्येति यथोक्तविशेषणप्रणवे प्रत्यंचं प्रतिपद्य कृतकृत्यो भवतीत्याह एवं हीति श्लोकार्धं व्याकरोति आदीति सर्वस्यैवोत्पद्यमानस्योत्पत्तिस्थितिलयाः यथोक्तप्रणवाधीना भवंतीत्यतस्तस्योक्तं विशेषणं युक्तमित्यर्थः तत्र परिणामवादं व्यावर्त्य विवर्त्तवादं द्योतयितुमुदाहरति मायेति अनेकोदाहरणमुत्पद्यमानस्यानेकविधत्वबोधनार्थं प्रणवस्य प्रत्यगात्मत्वं प्राप्तस्याविकृतस्यैव

आदिमध्यांता उत्पत्तिस्थितिप्रलयाः सर्वस्यैव मायाहस्तिरज्जुसर्पमृगतृष्णिकास्वप्नादिवदुत्पद्यमानस्य वि

सर्वस्य प्रणवो ह्यादिर्मध्यमंतस्तथैव च एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनंतरं॥ २७ ॥

यदादिप्रपंचस्य यथा मायाव्यादयः एवं हि प्रणवमात्मानं मायाव्यादिस्थानीयं ज्ञात्वा तत्क्षणादेव तदा

त्मभावं व्यश्नुत इत्यर्थः २७ ॥

स्व मायाशक्तिवशाज्जगद्धेतुत्वमित्यत्र दृष्टांतमाह यथेति यथा मायावी स्वगतविकारमंतरेण मायाहस्त्यादेरिंद्रजालस्य स्वमायावशादेव हेतुर्यथा वा रज्ज्वादयः स्वगतविकारविरहिणः स्वाज्ञानादेव सर्पादिहेतवस्तथा परमात्मा प्रणवभूतः व्यवहारदशायां स्वाविद्यासर्वस्य हेतुर्भवति अतो युक्तं तस्य परमार्थावस्थायां पूर्वोक्तविशेषणवत्त्वमित्यर्थः द्वितीयार्धं विभजते एवं हीति पूर्वोक्तविशेषणसंपन्नमिति यावत् ज्ञानस्य मुक्तिहेतोः सद्य

पांतरपिस्थानात्मीति॥

मांडू॰भा॰टी॰
३१

भवतीतिविघारहितंनिंदति नेतरदिति पादविभागस्यमात्राविभागस्यचाभावादोंकारस्तुरीयः सन्नमात्रो भवतीत्या
ह अमात्रइति ननुकथमनंतापरिछिन्नोंकारस्यतुरीयस्योच्यते न हि तत्रपरिछित्तिरेवास्तीत्याशंक्याह नैताव
त्वमिति अनर्थात्मकद्वैतसंस्पर्शाभावात्प्रतिबंधेन परमानंदत्वेन स्फुरिताविर्भवतीत्यभिप्रेत्याह सर्वेतियथा
व्याख्यातः एवं द्वैतनोक्तविशेषणवानित्यर्थः ननुयथोक्तप्रणवपरिज्ञानरहितस्यापि शास्त्रपरिज्ञानवत्त्वात्तज

नैतावत्वमस्यपरिछेत्तुं शक्यत इत्यर्थः सर्वद्वैतोपशमत्वादेव शिवः ओंकारो यथाव्याख्यातो विदितो येन
सपरमार्थतत्त्वस्यमननान्मुनिः नेतरो जनः शास्त्रविदपीत्यर्थः २९ इति श्रीगोविंदभगवत्पादपूज्य

इति मांडूक्योपनिषद्व्याख्याने गौडपादभगवतः कृतौ ओंकारनिर्णये प्रथमं प्रकरणं ॥१॥

32

शिष्यस्यपरमहंसपरिव्राजकाचार्य[illegible]स्य शंकरभगवतः कृतावागमशास्त्रविवरणे प्रथमप्रकरणं
॥मांडूक्यव्याख्याने समाप्तं॥ ॥

न्मोपलक्षितसंसारमात्त्वेनपुरुषार्थासिद्धिमेवं शास्त्रविदोपितत्त्वज्ञाना
भावे मुख्यपुरुषार्थासिद्धिरित्यभिप्रेत्याह नेतरेति तदेवं प्रणवद्वारेणानिरुपाधिकमात्मानमनुसंदधानस्यपु ग्रा॰ ३१
रुषार्थपरिसमाप्तिर्नेतरेषां बहिर्मुखानामिति स्थितं २९ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानं
दपूज्यपादशिष्यभगवदानंदज्ञानविरचितायां गौडपादीयभाष्यटीकायां प्रथमं प्रकरणं समाप्तं १॥ ॥

मांडुक्यवाख्यानं
समाप्तम्

32